Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

080550

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080550

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

May

स

महा

नन्त

सहक

श्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

May, 1944 Reg. No. C. 1073
Digitized by Arya Samaj Foundation Chennai and eGangotri

080550

सम्पादकः—
महामहोपाध्याया-
नन्तकृष्णशास्त्री
सहकारिसम्पादकः—
श्रीजानकीनाथ-
शास्त्री

भारते मातु भारती

संस्कृत-साहित्य-
परिषदो मासिकं
मुखपत्रम्

संस्कृतसाहित्यपरिषत्

80

इयं संस्कृत-साहित्य-परिषत् प्र
भावालोकैर्मनःपद्मं प्रकाशयतु

080550

May, 1944 } १८६६-शकीये वैशाखे २७श-वर्षस्य १म-संख्या } Vol. XXVII, No. 1

नववर्षम्

[निबन्धकः—श्रीविधुभूषणन्यायतर्कतीर्थः]

विहाय मूर्तिं मलिनां पुरातनीं
नवीनमादाय वपुर्मनोहरम् ।
प्रमोदकृन्मानव चेतसां भृशं
समागतं वर्षमिदं नवं पुरः ॥१॥

अनादिकालस्य जवेन गच्छतो
विवर्तितानेकयुगस्य नित्यशः ।
विशालताच्छेद इव प्रकल्पितं
समागतं वर्षमिदं नवं नृणाम् ॥२॥

प्रसन्नदिङ्मङ्गलशङ्ख निःस्वनं
महःप्रमत्तक्षितिवासिसङ्कुलम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसूनहारान्वितकुम्भगोपुरं
समागतं वर्षमिदं नवं पुरः ॥३॥
महोज्ज्वलालोकसमुज्ज्वलालयं
सुचारुगीतध्वनिभाग् दिगन्तरम् ।
समुत्थितानेकपताकमन्दिरं
समागतं वर्षमिदं नवं पुरः ॥४॥
अनेकवाणिज्यकरादिवासर-
मसंख्यलोकाश्रितराजमार्गकम् ।
प्रफुल्लवक्त्राखिलमानवैर्वृतं
समागतं वर्षमिदं नवं पुरः ॥५॥
विचित्रभूषार्भकवृन्दकौतुक-
मभीष्टदेवार्चनपूतमानवम् ।
पवित्रसत्केशवनामकीर्तनं
समागतं वर्षमिदं नवं पुरः ॥६॥
मुदा प्रियाभिः प्रणयान्वितेषु च
सरागमाकाङ्क्षितकाम्यसाधनम् ।
सहासदत्तार्थितवस्तुसञ्चयं
समागतं वर्षमिदं नवं पुरः ॥७॥
सलाजदूर्वादधिचन्दनाक्षतै-
र्विचित्रपुष्पैर्वृतदेवमन्दिरम् ।
सुरम्यवैदग्ध्यविलासचेष्टितं
समागतं वर्षमिदं नवं पुरः ॥८॥
कार्याणामविरोधतो बहुमता सिद्धिः सदा भाविनी
कल्याणं परितः सुरद्विजगुरुश्रद्धा च सच्चिन्तनम् ।
मिथ्याजल्पनहेलनं भवतु मे सत्यानुरागो महा-
नित्येषा मम कामना विभुपदे वर्षप्रभाते मुहुः ॥९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाब्दस्य

उपनिषत्प्रामाण्यचर्चा

(पूर्वानुवृत्ता)

[निबन्धकः—मः मः अनन्तकृष्णशास्त्री]

मतान्तरस्वरसतया प्रतीयमानानि सूत्राणि स्वस्वसिद्धान्तपरतया तैस्तैराचार्य्यैर्योज्यन्ते, तत्तदसाधारणसिद्धान्तपराणां वाक्यानां विवरणार्थतया प्रवृत्तानि इत्यपि तदनन्यत्वाधिकरणादौ दृश्यते।

दशोपनिषत्सु माण्डूक्योपनिषदः प्राधान्यन्तु सर्वसम्मतमेव। माण्डूक्योपनिषत्प्रतिपादिततुरीयात्मस्वरूपवादः त्रिपाद्विभूतिनारायणोपनिषत्प्रतिपादिततुरीयब्रह्मस्वरूपवादश्च अद्वैतवाद एव स्वरसः। माण्डूक्योपनिषत्प्रतिपादिततुरीयात्मस्वरूपवादः कथं मतान्तरसाधारण इति विचारस्तु तदवसर एव विशदीभविष्यति। माण्डूक्योपनिषत्कारिकाणां श्रुतित्वमेवेति तु द्वैतविशिष्टाद्वैतसिद्धान्तिनः। माण्डूक्योपनिषत्प्रतिपादिततुरीयात्मस्वरूपवाद एव कठवल्ल्यामपि विस्तरेणालोच्यते। माण्डूक्योपनिषदं त्रिपाद्विभूतिनारायणोपनिषदश्चाधिकृत्य तु ब्रह्ममीमांसायां न चर्चालेशोऽपि वर्तते। अतो ज्ञायते न सन्दिग्धा माण्डूक्योपनिषदिति। अतोपनिषदर्थस्य स्वरूपविज्ञाने माण्डूक्योपनिषदेकैवासन्दिग्धप्रमाणमिति मत्वैव मुक्तिकोपनिषदि प्रतिपादितम्, यत्—"माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये।" इति। कठवल्लीमधिकृत्य तु ब्रह्ममीमांसायां प्रथमाध्यायचतुर्थपादे चर्चा विशेषतः क्रियते। सापि चर्चा अद्वैतवाद एव स्वरसः, न मतान्तर इति भगवत्पादानुयायिनः, अन्ये तु मन्यन्ते स्वमत एव सा चर्चा स्वरसेति। त्रिपाद्विभूतिनारायणोपनिषदः माण्डूक्योपनिषदः कठवल्ल्यास्तैत्तिरीयच्छान्दोग्याद्युपनिषदाञ्च मुक्तिसाधनज्ञानविषयात्मस्वरूपविवेचनार्थं प्रवृत्तानामेकवाक्यताऽद्वैताभिमततुरीयात्मस्वरूपविवक्षायामेव सम्भवति नान्यथा। तत्त्वमस्यादिमहावाक्यानामपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमुमेवार्थमभिप्रेत्यासन्दिग्धत्वात् न पृथग्विचारार्थमधिकरणान्तरं ब्रह्ममीमांसायां वर्तते। अत्र विषये मतान्तराणामपि तात्पर्यं कठमाण्डूक्यादिसमालोचनप्रसङ्गेन विवेचयिष्यते।

(क्रमशः)

बुद्धवर्षविमर्षः

[निबन्धकः—सैंहलेयः श्रीधर्मपालः स्थविरः]

नमस्कृत्य जिनं सर्वविदं संशयघातकम्।
परिनिर्वाणवर्षं वै तस्य वक्ष्ये निराकुलम् ॥१॥
कलेर्युगाद्धर्मराजः परिनिर्वृतिमध्यगात्।
द्विसहस्रपञ्चशताष्टपञ्चाशाब्द एव तु ॥२॥
तत आरभ्य वर्षाणां गणना पूर्वसूरिभिः।
कृता प्रवर्ततेऽद्यापि क्रमशो नात्र संशयः ॥३॥
वर्तमानं परित्यज्य गृह्णीयात्तस्य सङ्ख्यया।
परिनिर्वाणविषयो भूतं वर्षं पुरा स्थितम् ॥४॥
परिनिर्वाणवर्षं तत्पुनर्मुक्त्वाऽर्थकोविदैः।
मुनेर्ज्ञेयं सङ्ख्ययैव तयोर्द्धं वर्तमानकम् ॥५॥
एवं प्रवर्तमानेऽस्मिन्वर्षे निर्व्याकुलं यथा।
दुष्टत्वमुपनीतं तत्तर्कोपहतमानसैः ॥६॥
तत्र केचिन्मुनेरब्दं पूर्णिमाया अनन्तरम्।
वैशाखस्य प्रतिपदमारभ्याऽददिरे किल ॥७॥
तदाक्षिप्य परे पौर्णमासीं तां घस्रमादिमम्।
कृत्वा वर्षं तदित्याहुरिति ज्ञेयं तदन्तरम् ॥८॥
तत्र यः प्रथमो वादी परिनिर्वाणवत्सरः।
तस्य नास्ति ततो वर्षं गतमित्याह दुर्मतिः ॥९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परेण स्वीकृतस्तादृक् परिनिर्वाणवत्सरः ।
मुक्त्वा तमपि स प्राह कदाचिद्वर्तमानकम् ॥१०॥
मुनेः प्रतिष्ठितवतो महेन्द्रस्यात्र सिंहले
वर्षं पुरातनाः प्राहुरित्थं तस्य मतं खलु ॥११॥
अमुक्ते सति तत्रैव परिनिर्वाणवत्सरे ।
सप्तत्रिंशद्द्विशतं वा वर्षमाह विमूढधीः ॥१२॥
तयोरेते मते साधू न मन्ये तर्कसङ्कुले ।
यथास्थितेन वर्षेण गण्योवर्षो मुनेरयम् ॥१३॥
टीकाकृता सम्यगुक्तं परिनिर्वाणवत्सरम् ।
मुक्त्वा ज्ञेयं वर्षमिति षट्त्रिंशद्द्विशतं तदा ॥१४॥
ततस्तर्कस्य मूलं या गतः कलिरिति प्रथा ।
गतत्वं तस्य बोद्धव्यं संवत्सरविबोधने ॥१५॥
माघे तु पौर्णमास्यां वै घोरं कलियुगं स्मृतम् ।
यथेदं लिखितं ज्ञेयं पुराणे ब्रह्मकर्तृके ॥१६॥
तदा संवत्सरः ख्यातः प्रमाथीति समुद्गतः ।
त्रयोदशोऽयं विज्ञेयो वत्सराणां विपश्चिता ॥१७॥
युगं यत्र समारब्धं वत्सरे कलिनामकम् ।
न्यूनान्प्रक्षिप्य तत्रैव षष्ठ्या भागान्हरेद्बुधः ॥१८॥
गतं यच्छेषकं तद्धि ज्ञात्वा गणकसूरिणा ।
अथोदयमनुप्राप्तः संवत्सरोऽवबुध्यते ॥१९॥
अन्यत्रावधिभूतं तद्वर्षं मुक्त्वा सुबुद्धिना ।
सम्प्राप्तमूह्यं वर्षं तद्यदूर्ध्वं सम्पतेत्क्रमात् ॥२०॥
यथा कलेर्नयोऽयं स्याद्बुद्धवर्षस्य तादृशः ।
नय एव हि वक्तव्यः सोऽन्येषामपि तादृशः ॥२१॥
कोऽयं वर्षो मुनीन्द्रस्य येन वर्षः स गण्यते ।
संशयस्तत्र हर्तव्यः प्रवर्ते तत्र सम्प्रति ॥२२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युगानामपि सङ्ख्याने चतुर्णामुपयुज्यते ।
सौरो वर्षो विनाधिक्यं वर्षाणां मूर्ध्नि यः स्थितः ॥२३॥
मेषाद्यै राशिभिर्वर्षः सौरो द्वादशभिर्मतः ।
मासैर्द्वादशभिश्चान्द्रश्चैत्राद्यैरपि तद्वशात् ॥२४॥
चान्द्रत्वमथ वर्षाणामृतूनां प्रथितं तथा ।
मासानाञ्चेति विज्ञेयं पुराणवचनात्ततः ॥२५॥
मासैर्द्वादशभिर्वर्षश्चैत्राद्यैर्यः स युज्यते ।
सम्बुद्धपरिनिर्वाणवर्षस्य गणनाविधौ ॥२६॥
बौद्धानामपि सर्वेषामन्येषाञ्च हितार्थिना ।
विमर्षोऽयं समुद्गीतो विमृष्य बहुधा मया ॥२७॥

"चउद्वार" ग्रामसंघटनकेन्द्रम्

[निबन्धकः—श्रीलक्ष्मीनारायण साहु एम्, ए]

भारतसेवासमित्या आनुकूल्येन परिचालितमिदं केन्द्रं कटकनगरात् क्रोशैकाभ्यन्तरेऽवस्थितम् । तीर्त्वा महानदीं विरूपाप्रवेशमात्रमेव दृष्टिपथातिथिर्भवति ग्रामोऽयम् । पुराणोऽयं ग्रामः । पूर्वं हायनसहस्रादत्रासीद्राज्ञश्चुङ्गदेवस्य सेनानिवेशः । तत्रासन्नवतिसहस्रपरिमिता गजाः । ग्रामस्यास्य प्राकृतिकं दृश्यं तथा दिशां चतसृणां दृश्यं च चित्ताकर्षकम् । पुराऽऽसीदयं चतुर्द्वाराभिधो ग्रामो जैनसभ्यानां सुप्रसिद्धं केन्द्रम् । यदत्र समुपलभ्यते शिल्पनिदर्शनं तत एवानुमीयते प्राधान्यमस्य ग्रामस्य । लुप्तलाञ्छनर्षभलाञ्छनजैनयोर्विहायमूर्त्तीरुपतारावलोकितेश्वराद्या बौद्धमूर्त्तयोऽत्रसमुपलभ्यन्ते । एषु विग्रहेषु महायानहीनयानयोः संघर्षस्य समन्वयस्य च परिचयोपलब्धिर्भवति । कनिस्कस्य राज्ञो राज्ये हीनयानमहायानयोः समन्वयार्थं प्रयत्नोऽभूत । इदानीमत्र नवोत्कलप्रदेशशासनकर्तुं र्निवासनिलयनिर्माणप्रस्तावः प्रचलति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयं ग्रामो भविष्यति व्योमयानावतरणस्थलमिति स्थिरीक्रियते। भारतसेवासमितिपक्षतोऽत्र बालानामुच्चशिक्षार्थं स्थापितश्चैको विद्यालयः। साधाराण्येनात्र शिक्षार्थिभ्यो दीयत उच्चशिक्षा। अस्त्यत्र पुस्तकालय एकः, औद्योगिकशिक्षाप्रसरोऽप्यस्ति। कुष्ठिनां चिकित्सार्थं भवत्यत्र व्यवस्था शलाकाप्रयोगस्य। चतुर्दिवस्थितानां ग्रामाणां स्वास्थ्योन्नतये दातव्यचिकित्सालयोऽप्यस्त्यत्र। संस्कृतशिक्षायै धर्मशास्त्राचार्यसाहित्यशास्त्री कश्चिन्नवागतश्चात्र तिष्ठति। भारतसेवासमितिपक्षतोऽत्र बालचटकेन्द्रमेकमनुष्ठितमस्ति—यस्य परिचालनभारो महामतिगोखेलप्रतिष्ठितभारतसेवासमित्याः कस्यचित सभ्यस्योपरि न्यस्त आसीत। परमधुना निबन्धलेखकस्योपरि भारोऽयं न्यस्तः। लेखको याचते भवतां सविधौ केवलमाशिषमेव शमिति

संस्कृतनाटकानि

(उत्तरार्धम्)

(ग्रन्थकर्ता—वि. कृष्ण स्वाम्ययय्यङ्गार्यः सुभाषिणीसम्पादकः श्रीचामराजेन्द्र संस्कृतमहापाठशाला, कल्याणपुरी)

भासादीनां प्राचीनकवीनां नाटकेषु महाभारतरामायणादेरितिहासादेव नाटकीय कथावस्तूनामुपादानात्पूर्वं नाटकानामादिमं रूप मुपादानभूतं पुराणेतिहासेष्वेवान्तर्भवतीति केचिद्विमृशन्तः पौराणिकाः प्रथमं पद्यानि पठन्ति स्म ; पाठकाः प्रायशः सयंगत पौराणिकैरुच्चरितान्येव पद्यानि गायन्ति स्म ; कथका भावपूर्वकमभिनयमङ्गीकृत्य सरसं 'हरिकथाः' प्रतिपादयन्ति स्म, एवममीषां पाठककथकपौराणिकानां सम्पर्कात सम्भाषणापद्धतेस्समावेशानन्तरं पूर्णरूपाणि नाटकान्युदपद्यन्तेति ते सम्भावयन्ति। परन्त्वत्रापि महान्विवादो जागर्ति। पुराणानामाकरतया स्वीकारो नास्मिन्प्राचीननाटके कुत्रापि दृश्यते। प्रख्यातानि रामायणादावुदाहृता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्येव वस्तूनि भासादिभिस्स्वेषु नाटकेषूपात्तानि न पुराणप्रोक्तानि। पुराणानां कालस्य नास्त्यावधि निष्कृष्टरूपेण निर्णीतः। प्रायो बहूनि पुराणानि वैदिक-धर्मस्य पुनरुज्जीवनदशायां सप्तमशतके प्रादुर्भूतानि वितर्क्यन्ते। क्रिस्तात्पूर्वमेव प्राबल्यमुपेतो बौद्धधर्मः सप्तमशतकपर्यन्तमत्युन्नतमुच्छ्रायस्थानमेवाध्यतिष्ठत्। क्रमेण च क्षीणदशामुपसंप्राप्तोऽपि वैदिकधर्मः पुनरुज्जीवन-साधनं सार्वत्रिकं प्रचारं (Propaganda) पुराणप्रणयनद्वारा प्रारभत। वैदिक-धर्मस्य श्रेष्ठतां सत्यताञ्च यथावकाशमुपन्यस्यन्ति परकीयधर्मस्यापकर्षमशुभंयुत्वञ्च सम्यगुपपादयन्ति कथाकथनात्मकत्वात्सर्वजनग्राह्याणि पुराणानि शीघ्रमेव सर्वत्रादरणीयानि संवृत्तानि। पुराणेषु प्रतिपादितानि च रमणीयान्यति मानुषाणि कथानकानि धर्मभीरुतामुत्पादयन्ति स्म, यतस्तानि सादराभिमानं पठन्तो धीमन्तोऽन्याय्याचरणेऽधर्मपरिग्रहे च देवता दण्डयिष्यन्तीति भीतास्सत्पथमशिश्रयन्। दण्डभीतिमन्तरेण न कश्चिदन्याय्यान्मार्गान्निवर्तते। वैदिकधर्मस्य प्राशस्त्यमाविष्कृतमवेक्ष्य बुद्धमतानुयायिनोऽपि बहवः संशयडोलामधिरुरुहुः। अन्ते च पुराणप्रणेतॄणामखण्डितेन धर्मप्रचारेण वैदिकमतस्याभिवृद्धिर्बौद्धधर्मस्यान्तर्धानञ्च समभवताम्। तस्माद्बहूनि पुराणानि सप्तमशतकस्य मध्यभागे' विरचितानिः स्यु''रिति सम्भावनामात्रमत्र गमकमुपलभ्यते। बुद्धधर्मस्य विलोपे वैदिकमतस्य पुनरुद्धारे च कानि कारणानि स्युरिति विमृशन्तो विद्वांसः कल्पयामासुरीदृशमेकैकं वितर्कम्।

(क्रमशः)

विषयाः—नववर्षम्। उपनिषत्प्रामाण्यचर्चा। बुद्धवर्षविमर्शः। चउद्धार ग्रामसंघटनकेन्द्रम्। संस्कृतनाटकानि।

संस्कृत-साहित्य-परिषत्, श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकत्रयम् ३)
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.

Printed at the Calcutta Oriental Press, Ltd.,
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
महामहोपाध्याया-
नन्तकृष्णशास्त्री
सहकारिसम्पादकः—
श्रीजानकीनाथ-
शास्त्री

भारते भातु भारती

संस्कृत-साहित्य-
परिषदो मासिकं
मुखपत्रम्

सफलं नयनं विरिञ्चिना
मम बन्धो कृतमद्य मन्यते ।
यदिदं पुरतो विलोकितं
…ऽनङ्गसायकम् ॥११॥
इयं संस्कृत-साहित्य-परिषत् प्रातः
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

June, 1944. } १८६६-शकीये ज्यैष्ठे २७श-वर्षस्य २य-संख्या { Vol. XXVII, No. 2.

राधादर्शनम्

[निबन्धकः—श्रीविधुभूषणन्यायतर्कतीर्थः]

रमणीकुलशेखरा क्षितौ
चपला मुग्धमरालगामिनी ।
यमुनापथमुज्ज्वलं त्विषा
कुरुते का सुबलाबला त्वियम् ? ॥१॥

अरुणाङ्घ्रिरलक्तरञ्जितौ
क्षिपति क्लान्तपदौ गलद्रसौ ।
धरणौ स्थलसारसश्रियं
प्रलिखन्तीव मुहुर्मनोहराम् ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरदिन्दुनिषेवितोल्लस-
न्नखराजिर्मधुरैः पदे पदे ।
कलनूपुरतालशिञ्जनैः
किल हंसान् दिशतीव सद्गतिम् ॥३॥

सुनितम्बविघातमञ्जुल-
क्वणिताधोरशना सुमध्यमा ।

भंयुत्वञ्च सम्यगुपपादयन्ति कथाकथनात्मकत्वात्सर्वजनग्राह्याणि पुराणानि शीघ्रमेव सर्वत्रादरणीयानि संवृत्तानि । पुराणेषु प्रतिपादितानि च रमणीयान्यति मानुषाणि कथानकानि धर्मभीरुतामुत्पादयन्ति स्म, यतस्तानि सादराभिमानं पठन्तो धीमन्तोऽन्याय्याचरणे [illegible] देवता दण्डयिष्यन्तीति भीतास्सत्पथ [illegible]

रुचिरोत्तुङ्गपयोधराकुला ॥५॥

हृदयोन्मथनाय कल्पिता
दधतं कामशरोपमाङ्गुलीः ।
श्लथलम्बितमुत्तमं करं
ललितं कम्पयते पुनः पुनः ॥६॥

मणिकुण्डलदीप्तिचुम्बितो-
ज्ज्वलहेमद्युतिगण्डमण्डिता ।
मुखसौरभचौरवायुना
प्रचलन्मेघनिभालका मुहुः ॥७॥

मधुराननपङ्कजा पुन-
स्त्वथ साचीकृतनेत्रषट्पदा ।
ननु मामभिपश्यति प्रियं
कपटान्मन्दगतिः कटाक्षकैः ॥८॥

चपलाथ मदीयवीक्षणै-
र्मिलिताक्षी सहसेव लज्जिता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चकिता हरिणीव सस्मिता
नयने घूर्णयतेऽन्यतः पुनः ॥९॥
धृतसिक्तसुनीलवाससो
गलिता नीरकणाः समन्ततः ।
नवयौवनमद्यनिर्भरा-
निव चास्यास्तनुतेऽङ्गवल्लरी ॥१०॥
सफलं नयनं विरिञ्चिना
मम बन्धो कृतमद्य मन्यते ।
यदिदं पुरतो विलोकितं
युवतीरत्नमनङ्गसायकम् ॥११॥
किमियं तरुणप्रमाथिनी
नवशृङ्गाररतिः शरीरिणी ।
अथवा सुरलोककाननात्
पतिता स्वर्णलता च्युता क्षितौ ? ॥१२॥
शृणु मित्र वचो यथार्थतो
ह्यनया यौवनपुष्पमालया ।
तरलीकृतमन्तरं मम
शशिना सिन्धुरिवाद्य सर्व्वथा ॥१३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जैनदर्शने सांख्यादिदर्शनसाम्यम्

[निबन्धकः—श्रीआशुतोषन्यायाचार्य्यः]

जैनदर्शनं, स्याद्वाददर्शनम्, अनेकान्तदर्शनम् इत्यनर्थान्तरम्। स्याच्छब्दो हि कथञ्चिदित्यर्थकोऽव्ययस्तेन स्याद्वाद इत्यस्य कथञ्चिद्वाद इत्यर्थः प्रतिभासते। कथञ्चित् (सर्वथा न) इति शब्दश्चानेकान्तत्वं द्योतयति अत एवोक्तम्—

वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणम्।
स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपकः॥ इति।

एतदर्थश्च—गम्यम् अस्तित्वादि विशेषणं प्रति अनेकान्तद्योती तिङन्तप्रतिरूपकः स्यान्निपातः अर्थयोगित्वात् अनेकान्तत्वरूपार्थप्रतिपादकत्वात् वाक्येषु व्यवह्रियत इति शेषः। अन्यथा स्यादस्तीत्यादौ स्यात् पदमनर्थकं भवेदिति।

अनेकान्तशब्दश्च अनेकस्वरूपार्थकः, तथाहि एकोऽद्वितीयोऽन्तः पक्षो यस्यासौ एकान्तः एकस्वरूप इति यावत्, स न भवतीत्यनेकान्तः। तेन स्याद्वादानेकान्तवादशब्दयोस्तात्पर्यविषयीभूतोऽर्थ एक एव प्रतिभाति। एवं स्यादिदं पुस्तकमिति कथञ्चिदिदं पुस्तकमिति वोक्ते—इदं सर्वथा न पुस्तकमपि तु कियदंशेन पुस्तकमित्यर्थः स्वत एव प्रतिभाति; तथैकान्ततः पुस्तकं नेत्युक्तेऽपि स एवार्थः प्रतिभान्ति।

अत एव जैनदार्शनिकाः स्याच्छब्दे नैवानेकान्तत्वं प्रदर्शयन्तः स्याच्छब्दलाञ्छितं तत्समानार्थक-कथञ्चिदित्यादि-शब्दसनाथं वा "स्यादिदं पुस्तकं", "कथञ्चिदिदं पुस्तकम्" इत्यादि वाक्यं प्रमाणत्वेनोररीकुर्वति।

ते च वस्तूनामनेकरूपत्वमेवं प्रसाधयन्ति—यथाहि दृश्यमान-पुस्तकस्य पुस्तकरूपत्वं तथा तस्य पत्र-द्रव्यत्व-पृथिवीत्व-सत्त्व-प्रमेयत्व-वाच्यत्वाद्यनन्तरूपत्वमप्यस्ति। कथमिति चेत्—उच्यते। तथाहि पुस्तकं पत्रसमष्टि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपं, समष्टिश्च व्यष्टेर्न भिन्ना अवयवावयविनोः सर्वथाभेदाभावात् इति पुस्तकस्य पत्ररूपत्वम्। एवं पुस्तकाश्रयाः पुस्तकत्व-पृथिवीत्व-द्रव्यत्व-सत्त्व-प्रभृतिजातयोऽपि स्वाश्रयात् पुस्तकतो न सर्वथाभिन्नाः, सर्वथाभिन्नत्वे तेषां पुस्तकादिना सम्बन्धानुपपत्तेः, ययोर्हि सर्वथाभेदो न तयोः सम्बन्धो भवति यथा घटत्वपटत्वयोः। अतः पुस्तकस्य पुस्तकत्वादिजातिरूपत्वम्। एवं पुस्तकस्य रूपरसादयो गुणास्तथा क्रिया अपि पुस्तकतो न भिन्ना गुण-क्रिययोः स्वाश्रयाभिन्नत्वात्, तेन पुस्तकस्य स्वगतानेकगुणक्रियारूपत्वम्। एवं पुस्तकावयवानां पुस्तकाभिन्नतया, तदवयवानाञ्च तदवयवाभिन्नतया इत्येवंक्रमेण पुस्तकस्य स्वावयवपरम्पराघटकपरमाणुरूपत्वमप्यस्ति। स्थूलत्वन्तु स्वत एवास्ति।

परमाणु-सत्त्वादीनाञ्च नित्यतया तदभिन्नपुस्तकस्य नित्यत्वमप्यस्ति। स्वतश्चोत्पादविनाशशलितयाऽनित्यत्वमप्यस्ति। तथा प्रतिक्षणमेव सर्वेषां वस्तूनां सदृशा विसदृशा वा परिणामा भवन्ति। ते हि परिणामाः पर्याय-शब्देनोच्यन्ते जैनदार्शनिकैः। ते च पर्याया वस्तुनोऽभिन्ना इति पुस्तकस्य तत्तत्पर्यायरूपेण क्षणिकत्वमप्यस्ति। तथा पुस्तकत्वादिरूपेण बहुकालं व्यवह्रियमाणतया पूर्वाभेदेन प्रत्यभिज्ञायमानतया च तस्य स्थिरत्वमप्यस्ति। तथैव पुस्तकं स्वीय-द्रव्य-क्षेत्र-काल-भाव-सम्बन्धेन सद् भवति, परकीय-द्रव्य-क्षेत्र-काल-भाव-सम्बन्धेन चासद् भवति। तथाहि-"द्रव्यम्—अव-यवः, तच्च पुस्तकस्य पत्रं तत्सम्बन्धितया च पुस्तकं सत्, परकीयं द्रव्यं तन्त्वादिकं तत्सम्बन्धितया च पुस्तकमसत्।

(क्रमशः)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतनाटकानि

(पूर्वानुवृत्तानि)

[ग्रन्थकर्ता—वि. कृष्ण स्वाम्यय्यङ्गार्यः सुभाषिणीसम्पादकः,
श्रीचामराजेन्द्र संस्कृतमहापाठशाला, कल्याणपुरी]

अत्र कियद्दूरं प्रामाण्यमस्तीति भगवान्काल (Time) एव विजानीयात्। वस्तुतो भासादिभ्यः प्राचीननाटककारेभ्योऽर्वागेव पुराणानामुत्पत्तिरिति स्वीकर्तुं शक्यम्। नन्वेवमष्टादश पुराणानि वेदव्यासकर्तृकाणीति प्रवादो विरुध्येत, रामायणादपि प्राचीनस्य महाभारतस्य वेदव्यासकर्तृकस्यैतेषां पुराणानाञ्चैककालिकत्वासम्भवादिति चेन्न, पुराणानां प्रणेता वेदव्यास इत्यस्यैवासिद्धेः। विष्णुपुराणादिषु बहुषु भगवतो नारायणस्य शिवपुराणादिष्वनेकेषु भगवतः पार्वतीपतेश्च पारम्यमुपन्यस्तम्। न ह्येवमन्योन्यविरुद्धानर्थानेकः कर्ता प्रतिपादयितुमलम्भवति। क्वचिद्विष्णुना शिवस्य क्वचिच्च शिवेन विष्णोरुपासनमभूदिति कथा सविस्तरमुपवर्ण्यते। एतादृशानां परस्परव्याहतानां विषयाणामेकेन वेदविभागविशारदेन पूर्वापरपर्यालोचनानिपुणेन कर्त्रा निबन्धनासम्भवात् पुराणानि भिन्नकर्तृकाण्येवेति पाश्चात्त्यानां सिद्धान्तः। तेषामेव वचनानुसारेण नाटकानां पुराणानाञ्च प्राथमिकः सम्पर्को न कदापि सम्भवतीति निरूपितम्।

अथ काममङ्गीक्रियतां नाम पुराणानां प्राचीनत्वमपि। पुराणशब्दश्चायं तदैवान्वर्थो भविता यदा विष्णुपुराणादीनां क्रिस्तादपि पूर्वमेव प्रणयनमभ्युपगम्यते। महाभारतेऽपि पौराणिकानां विषयाणामुल्लेखस्तत्र तत्र विरचितः, पुराणानि च नामनिर्देशपूर्वकं प्रमाणतयोपात्तानि। यद्यप्यग्निपुराणादीनां लाक्षणिकविषयव्यवस्थापकत्वदर्शनात्प्रसक्तानुप्रसङ्गेन तेषु नानाविधानामलङ्कारशास्त्रादिसम्बद्धानामतिसूक्ष्माणामपि विचाराणां विस्तरेण विमर्शदर्शनाच्च तान्यर्वाचीनानीति वक्तुं शक्यम्, तथापि तादृशानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भागानां प्रक्षिप्तत्वमङ्गीक्रियतां नाम । महाभारतेऽपि प्रथममुपलब्धो भागोऽतिस्वल्पः, अनन्तरकालिकैश्च स्वस्वमत्यनुसारेण प्रक्षिप्ता बहवोऽंशा इति यथा सिद्धान्तितम्, एवमग्निपुराणादिष्वपि लाक्षणिकयुगसम्बद्धत्वादर्वाचीनतया प्रतीयमाना विषयाः पश्चादन्यैः प्रक्षिप्ताः, पूर्वन्तु स्वल्पकथाप्रपञ्चान्युपदेशरूपाणि पुराणानि निरमीयन्त वेदव्यासेनैवेति स्वीकारस्यादुष्टत्वात् । परस्परविरोधस्तु पुराणानामर्थवादरूपतया तत्तद्देवतासमुत्कर्षमात्रज्ञापकत्वात्परिहरणीयः । न हि पुराणप्रतिपादिताः सर्वा अपि कथाः सत्या एवेति कश्चिदुपपद्यते मूढविश्वासः । नानाधर्मानवलम्बमानानामशेषाणां लोकानामुद्धाराय तत्तत्सिद्धान्तानुकूलानि सर्वमतसाधारणानां सद्गुणानामुपदेशकानि पुराणानि भगवता वेदव्यासेन प्रणीतानीत्यविरोधात् । शैवमतानुयायिनामनुसन्धानाय शैवपुराणं विष्णुभक्तानामनुदिनपारायणाय विष्णुपुराणमिति तत्तद्धर्मीयाणामुद्धाराय तत्तत्पक्षानुगुणानामेव पुराणानां प्रणयनसम्भवात् । महाभारतेऽपि क्वचिच्छिवपारम्यप्रतिपादकानां विषयाणामुपन्यासेन तस्याप्यनेककर्तृकत्वापत्तेरनिष्टत्वात् । पाश्चात्यवासनाप्राबल्येऽपि रामायणादीनां प्रमाणग्रन्थानामनेककर्तृकत्वमित्यङ्गीकारानौचित्यात् । एवं शाकुन्तलादिष्वपि सूक्ष्मतमं भाषाशैलीव्यत्यासमुपजीव्य नानाकर्तृकत्वस्योपपादयितुं शक्यत्वाच्च । वायुपुराणादीनामतीव प्राचीनत्वमिति पाश्चात्त्यैरेव समर्थनाच्च । तस्मादासतां नाम प्राचीनान्येव पुराणानि सर्वाण्यपि, भासादिभिरपि पुराणेभ्य एव स्वीयनाटकानामितिवृत्तान्युपात्तानीति सिध्यतु । नैतावता नाटकानां मूलं पुराणेष्वन्तर्भवतीति सूपपादम् । नाटकलक्षणेष्वेकस्यापि पुराणकथास्वदर्शनात् । पुराणानां सर्वेषामपि 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेदि'त्युक्तरीत्या धर्मोपदेशमात्रे तात्पयपर्यवसानात् । 'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । भूम्यादेश्चैव संस्थानं पुराणं पञ्चलक्षणमि"त्यमरसुधाकारेणोदाहृते वचने,तृतीयपादे"वंशानुचरितञ्चैवे"ति पाठान्तरेण विशिष्टे सार्वजनिके च वचने पुराणलक्षणानां स्पष्टतया प्रतिपादनेन धर्मोपदेशस्यैव पुराणपठनफलतया सिद्धान्तनीयत्वात् । नाटकेषु तु 'न हि कवेरितिवृत्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मात्रनिर्वाहेणात्मलाभ' इति ध्वन्याचार्याणामुक्तिमनुरुध्य रसपरिपोषस्य प्राधान्याङ्गीकारादुद्देशभेदस्य स्पष्टतया पुराणानां नाटकमूलत्वमनुपपन्नमेव। अन्यथा यमयमिसंवादे सरमापणिसंवादे च सम्भाषणपद्धतेर्दर्शनात् प्राचीनतमस्य ऋग्वेदस्यैव नाटकमूलत्वमापद्येत। न चैतादृशं पारम्परिकप्रगतिसाधनमपि सम्भाषणादिकं मूलतया स्वीकर्तुमुचितम्। भाषोत्पत्तेरेव नाटकमूलत्वव्यवस्थापनसम्भवात्। न हि भाषामन्तरेण नाटकानीमान्युद्पद्यन्तेत्यतस्संस्कृतभाषा नाटकानां मूलमिति वादश्चेद्विदुषामभिमतः, तर्हि पुराणोदाहृतानामेव कथानामुपादानान्नाटकानां मूलं पुराणान्येवेति वादोऽपि यथाकाममभ्युपगन्तव्यो भविष्यति। एतावता 'प्रख्यातमिति· वृत्तमुपवर्णयन्कविर्विषयवैलक्षण्याद् ग्रन्थप्रचारे संपद्यमाने कीर्तिशाली भवती' ति परिकल्पितं नियममनुरुन्धानैर्भासादिभिः पौराणिकानां कथावस्तूनामुपादानेऽपि पुराणेषु नाटकानां मूलस्वरूपमुलभ्यत इति वादो निर्युक्तिक इत्येव प्रतिपिपादयिषितम्। वक्तृवैलक्षण्यवत्प्रतिपाद्यवैलक्षण्यस्यापि ग्रन्थोत्कर्षहेतुत्वावधारणादेव प्रख्यातस्येतिवृत्तस्योपादानमुचितम्भवतीति नेदमावेदनीयं पृथग् विमर्शकधुरन्धराणाम्।

(क्रमशः)

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकत्रयम् ३)
Foreign price—7s.

Printed and Published by

Dinabandhu Sahityashastri

Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.

Printed at the Calcutta Oriental Press, Ltd.,
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

July, 1944. Reg. No. C. 1073

सम्पादकः—
महामहोपाध्याया-
नन्तकृष्णशास्त्री
सहकारिसम्पादकः—
श्रीजानकीनाथ-
शास्त्री

संस्कृत-साहित्य-
परिषदो मासिकं
मुखपत्रम्

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

July,	१८६६-शकीये आषाढ़े	Vol. XXVII,
1944.	२७श-वर्षस्य ३य-संख्या	No. 3.

संस्कृतनाटकानि

(पूर्वानुवृत्तानि)

[ग्रन्थकर्ता—वि. कृष्ण स्वाम्यय्यङ्गार्यः सुभाषिणीसम्पादकः,
श्रीचामराजेन्द्र संस्कृतमहापाठशाला, कल्याणपुरी]

अत्र केचिद् ग्रीकाणां सम्पर्कादनन्तरमेवेति नाटकानामुत्पत्तिरवकाशमलभतेति प्रत्यवतिष्ठन्तो भारतीयाः स्वतंत्रतया साहित्यक्षेत्रे प्रगतिमसाधयन्निति पक्षमेते न मर्षन्ति । विज्ञानशाखास्विव ज्ञानप्रधानेषु साहित्यादिष्वपि क्षेत्रेषु भारतीयाः पाश्चात्यानामादर्शमनुसृत्य कृतकृत्या बभूवुरिति साग्रहमेते विवदन्ते। एषां वादधोरणी च कारणानि वक्ष्यमाणान्यवलम्बते —"पाश्चात्यानां प्रभावादेव भारतीयास्साहित्यिकीं पुरोभिवृद्धिमासेदुः । प्रथमतो ग्रीका भारतदेशं क्रि.पू. ३२७ वर्षे महावीरस्यालक्सान्द्रस्य नायकतायामाचक्रमुः। एतेषामभियोगस्सर्वत्र सफलो बभूव। ग्रीकाणामप्रतिमं शौर्यं प्रतिकर्तुमसमर्था भारतीयाः पराजयमवापुः । ग्रीकाणामुपायकुशलतया प्रत्युत्पन्नबुद्धितया च महतीष्वपि विपत्तिष्वेते दुर्जया इति निश्चित्य परित्रस्ता भारतीयास्स्वदेशमर्यादारक्षणाय समरक्षेत्रे पदं निधाय ग्रीकैः परलोकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रापिताः। एवमुपनमन्तीषु विजयपरम्परासु ग्रीकसाम्राज्यमस्यां भारतभूमौ प्रतिष्ठापयितुं मतिमधत्त महावीरोऽलक्सान्द्रः। तथैव क्षत्रपनागकान्प्रतिनिधीन् प्रतिष्ठाप्य स्वसैनिकानामाग्रहपूर्विकयाऽभ्यर्थनया समग्रमप्यार्यावर्तमात्मसात्करिष्यामीति स्वीयमिष्टमसम्पूरितमेव पृष्ठतः कृत्वा प्रतिनिववृते। अलक्सान्द्रात्पूर्वमपि परकीयानामधिकारो भारतमुपदुद्रावेति प्रमाणैः स्पष्टमवगम्यते। भारतदेशनिवासिनो हि प्रकृत्या धर्मशीलाः परपरिपीडनेष्वनुत्साहिनः शान्तस्वभावा आर्यास्समरव्यापारपराङ्मुखा ऐतिहासिकात्कालादपि (Prehistoric) प्राक् परेषामभियोगस्य लक्ष्यान्यवर्तन्त। क्रि.पू. ५०० तमाद्वर्षादारभ्य क्रि. पू. ३३१ तमवर्षपर्यन्तं भारतदेशस्यातीवोत्तरो भागः पर्षियादेशीयानामभिषेणनस्य लक्ष्यमभवत्। प्रथमः सिरस्नरपतिः गान्धाराणान्तकानाञ्च स्वाम्यमङ्गीचकार। बेहिस्तनस्य पेरस्पोलिसस्य च (इमे द्वे पारसीकनगरे) शिलाशासनानि सिरसादनन्तरं राज्यमधिष्ठितवती डेरियसहिस्तास्पिस्नामकस्य राज्ञो न केवलं गान्धारेषु परन्तु सिन्धुनदीप्रान्तेष्वप्रतिहतमासीद्राज्यशासनमिति प्रतिवेदयन्ति। हिरोडोटसस्तु 'चक्रवर्त्येष उत्तरभारतीयानां प्रजानामधिपतिरासी'दिति व्यलिखत्। क्रि.पू. ५०९ वर्षे डेरियसस्य चक्रवर्तिनो निदेशेन स्कैलाकूस्नामको ग्रीको भारतदेशमागम्य सिन्धुनद्यां नौकायानमारभतेत्यपि विज्ञायते। एतस्य लेखानामाधारेणैव हिरोडोटसादयो ग्रीकचरित्रकारास्स्वकीयान्प्रामाणिकान्ग्रन्थान्विलिखन्तो भारतदेशस्य विषयानप्युपन्यास्थन्। क्रि. पू. ४८० वर्षे ग्सर्क्सस् (xerxes) नामकस्य पारसीकराजस्य सेनायां ग्रीकदेशं पराजित्य स्वायत्तीकर्तुं प्रेषितायां गान्धारीया भारतीयाश्चेति केचिद्विभागा (divisions regements) आसन्नित्यवगम्यते। हिरोडोटसस्तेषां वेषभाषादिकं वर्णयतिस्मापारसीकसाम्राज्ये भारतदेशस्य क्षत्रपभागः (Satrapy Compared with Presidency, etc.) प्रधानतमः पर्यगण्यतेति, तस्यैव चरित्रकारस्य निर्देशाद्विज्ञायते।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छात्र-जीवनम्

[श्रीवाणीराणीसिंह-निबद्धम्]

मनुजानां सर्व एव जीवनकालः शिक्षावसरः। यद्यपि आ मरणान्मानवा यतः कुतश्चिदपि विषयात् किञ्चिदपि ज्ञानं लभन्ते, तथापि ते यस्मिन् वयसि गुरुगृहमधितिष्ठन्तो विद्यामन्दिरं वा यथारीत्यधिगम्य ज्ञानमर्ज्जयन्ति स एवावसरस्तेषां छात्रजीवनमिति कथ्यते। अस्मिन्नवसरे नराः सांसारिकेभ्यो विषयेभ्यो विरताः पृथगवस्थातुं शक्नुवन्ति। अतस्तदानीमनन्यमनसा ज्ञानार्ज्जनमेव तेषां प्रधानं कर्म्म। निर्बाधोऽयमवसरोऽध्ययनरूपस्य तपसः। तपस्विनो यथा स्नानपानाहारादिकं जीवनधारणार्थमेव सम्पाद्य तपसि सर्वां शक्तिं नियोजयन्ति, तथास्मिन् छात्रवयसि छात्रैरपि भोगविलासादिकं नियमाद् विहाय ज्ञानार्ज्जनाय सकला एव शक्तिर्नियोक्तव्या अधिकश्चावसरो दिवसस्य व्ययितव्योऽध्ययनविषये ; अतः "छात्राणामध्ययनं तपः" इति सूक्तम्।

समवयस्कैः सहपाठिभिः परिवृतः संसारचिन्ताविहीनोऽध्ययनैकशरणस्तदा कीदृक् चित्तामोदकरं सुखमवाप्नोति तन्नास्त्यविदितं छात्राणाम्। प्रायश आबाल्याद् यौवनं यावदेतदवस्थानुवर्तनम्। अस्मिन् वयसि शरीरं स्वस्थं पूर्णबलञ्च, मनश्च चिन्ताविहीनमुत्फुल्लञ्च वर्त्तते, चित्तवृत्तयश्च पूर्णतया विकाशमधिगच्छन्ति। उत्साहोद्यमादयस्तदानीं पूर्णभावेनाविर्भवन्ति। अतो यस्मिन् कर्मणि प्रवृत्तिर्जायते तदेव ते सुष्ठु सम्पादयितुं शक्नुवन्ति। तच्च कर्म्म सदसद्वेतिविवेकस्याल्पतयास्मिन् समये सावधानतामवलम्ब्य सद्गुरोः सन्निधौ तदुपदेशानुसारिभिर्ब्रह्मचर्येणावस्थातव्यम्।

इह खलु संसारे पापपथा सहस्रशः उन्मुक्ता आपातमधुरत्वेन सुगमाश्च। पुण्यपथानान्तु उन्मुक्तानामपि दुर्गमत्वेन पुण्यार्जनं भवति दुष्करं नराणाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वभावकोमलानां सदसद्विवेकहीनानां बालानां बुद्धिरनायासेन पापपथं नीयते कुमतिकलापैः। प्रायशोऽस्मिन्नेव समये कुसङ्गसम्पर्किता बहव एव बालका अधः पतन्ति, नच प्रायेण पुनरुत्थातुं शक्नुवन्ति। अतश्चाबाल्यादेव अवहितैश्छात्रैः कुसङ्गो विषमिव परित्यज्येत। उक्तञ्च—

बहुसुहृदनुरक्तिः प्रक्रिया चातिगुर्व्वी
लिखनविधिविरागः पुस्तकाशोधनञ्च।
श्वशुरगृहनिवासो विह्वलत्वं विषादः
स्थितिरपि निजगेहे मूर्खताहेतवोऽष्टौ॥ इति।

अपरञ्च—

अहेरिव गणाद् भीतो मिष्टान्नाच्च विषादिव।
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति॥ इति।

एतद्विधिनिषेधजातमनुपालयन्तो विद्यार्ज्जनमनायासेनैव कर्तुं शक्नुवन्ति च्छात्राः। ज्ञानार्ज्जनादृते उन्नतिसोपानारोहणमपि दुष्करम्। अतः कोमलमतीनां बालानां निर्मलं चित्तं यथा संसर्गदोषमलीमसं न भवति तथा बाल्यात् प्रभृतिं यतितव्यं पित्राद्यभिभावकजनैः। शुभ्रे वाससि मसीबिन्दुरिव चित्तमालिन्यं व्यापारशतेनापि नापयाति कोमलमतीनां बालानां हृदयात्। अतः सद्गुरुराश्रयणीयः। केवलं जनानां विद्यालाभ-परिचायकपदकादिप्राप्तिर्न मुख्यमुद्देश्यम्। यथा देवद्विजगुरुप्राज्ञ-पूजनं शौचमार्जवं च कृतविद्यानां चरित्रेषु परिलक्ष्यते, यथा च स्वदेश-प्रियता प्रबलतमा भवति, यथा वा उदारतापरोपकारादयः सद्वृत्तय उत्पद्यन्ते तथा सविशेषमुपदेष्टव्यं गुरुभिश्छात्रान् प्रति।

बाल्ये वयस्यपगते न पुनरेवं स्थास्यति शिक्षावसरः। संसारप्रविष्टस्य दरिद्रस्य तैलतण्डुललवणेन्धनचिन्तया न किञ्चिदपि मनसि स्फुरति। तदा पुत्रदारगृहाद्यर्थमर्थोऽर्थ इति ब्रुवाणा एव धनिद्वारं नित्यमुपासते दीनाः। आलस्येऽपरिहृते नास्त्याशा उन्नतिपथस्य। इदमालस्यं छात्रजीवनस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुष्परिहरो रिपुः कश्चित्। आलस्याधिष्ठितचेतसि कुमतयः स्थानं लभन्ते। अत आलस्यमवश्यमेव परित्यजेयुः।

संसारासक्तो बहुविधेन सांसारिकव्यापारेण तथा रोगशोकदैन्यादिना नित्यं नितरां व्यथमानहृदयः खेदमाप्नोति। संसारासक्ता वयं यद् यत् सुखमनुभवामस्तत्तु वस्तुतो न सुखकरमेव। केवलमशान्त्या एव नः कालोऽतिवर्त्तते। किन्तु छात्रजीवनमधितिष्ठतोऽध्ययनरतस्य पित्रादिबन्धुवर्गेण सततं सयत्नं पर्यवेक्ष्यमाणस्य जीवनमतीव सुखमयमिति मन्यामाहे अनुभवामश्च। परमेतज्जीवनमधितिष्ठतामज्ञानां पाठविमुखानां क्रीडादिनैव सदा कालोऽतिवर्त्तते। ते तदा न जानन्ति तादृक् छात्रजीवनं कीदृक् सुखकरमिति। अपिच भविष्यज्जीवनस्य वार्त्तां वारमेकमप्यचिन्तयित्वा आपातसुरसे भोगे निमग्नाः किमिव हि न कुर्वते। छात्रजीवनगार्हस्थ्यजीवनयोः पर्यालोचनया एतदेव वक्तुं शक्यते यदनयोश्छात्रजीवनं शान्तिप्रदं भविष्यज्जीवनोन्नतेः सोपानं सर्वविधसुखद्वारीभूतञ्च। इत्यलमतिविस्तरेण।

०8०550

श्रीरामकृष्णोदारकथाप्रसङ्गः

[निबन्धकः—स्वामी जगन्नाथानन्दः]

तथायश्चावतारस्ते भुवो भारजिहीर्षया।
स्वानाञ्चानन्यभावानामनुध्यानाय चासकृत ॥

श्रीरामकृष्णपरमहंसदेवः सार्द्धोनविंशशताब्दे 'कामारपुकुर'ख्ये ग्रामे ब्राह्मणक्षुदिरामस्य गृहे प्रादुरभूत, तत्राविर्भूय बाल्यलीलां परिसमाप्य यौवने कलिकातानगर्य्यामागच्छत्। आगत्य अस्या नगर्य्याः क्रोशव्यवहितोत्तरदिग्भागे पारे गङ्गमवस्थिते 'राणीरासमणि'नामधेययाः कस्याश्चित् कालीमन्दिरे दक्षिणेश्वरे भगवत्या देव्याः कालिकायाः पूजनाय नियुक्तो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बभूव। तत्र स्थित्वा द्वादश वर्षाणि विभिन्नसम्प्रदायानां साधनप्रकारान-वलम्ब्य तपश्चकार, इत्यादिकं संस्कृतसाहित्यपरिषत्पत्रिकायां प्रागुक्तम-स्माभिः। स सिद्धिलाभानन्तरमीश्वरेण प्रत्यादिष्टः कथं केन प्रकारेण प्रति भक्तगृहं गत्वा तत्र स्थित्वा च उत्तमश्लोकेश्वरस्य माहात्म्यं जनसंसदि प्रचारयामास, तत् सर्वं श्री'म'कथितं कथामृतमवलम्ब्य निरू-पयामः। आत्मारामा महात्मानो भीषणं भवसागरमुत्तीर्णा अपि त्रिताप-दग्धानां मानवानामुद्धरणाय जगती हिताय सनातनधर्म्मस्थापनाय च यदृच्छया भुवि विचरन्ति। एवं परमहंसदेवः श्रावणे मासि कृष्णे पक्षे षष्ठ्यां तिथौ द्व्यशीत्यधिकाष्टादशशततमे खृष्टाब्दे 'वादुड़बागाना'ख्यस्थाने ईश्वरचन्द्रविद्यासागरगृहं भक्तैः सह जगाम। भक्तवर्गपरिवेष्टितं प्रेमपाक-परिपूर्णविग्रहमीश्वरीयकथासु सहर्षपुलकमश्रुविलोललोचनं रुचिरदेहकान्तिं परमहंसदेवं दृष्ट्वा सर्व्वगुणालङ्कृतो विद्यासागरो यथाविधि पूजयाञ्चकार। कोऽयं परमहंसः किं तस्याचरणभाषणमित्यत्रोत्सुकाः पार्श्वगृहादन्यतश्च बान्धवाश्चान्ये श्रुतवृत्तास्तत्र समुपस्थिताः। ततः प्रमोदेन परस्परं तौ आलापयामासतुः। स्वयं मानमनिच्छन्तो मानदा भवन्ति महात्मान इति कृत्वाह परमहंसदेवः। मम भाग्यम्। यतोऽद्य त्वामालोकयन् सागरं प्रविष्टोऽस्मि।

विद्यासागरः। (सहास्यम्) तर्हि अस्मात् लवणसमुद्रात् किञ्चित् लवणाक्तं जलं गृहाण।

श्रीरामकृष्णः। ये तु अविद्याकामकर्म्मप्रभवा मलिनमानसा आशापाश-शतैर्बद्धा विवेकहीनास्ते लवणसमुद्रा इव भवितुमर्हन्ति। मैवं त्वं, यतः क्षीरनिधिरिव बहुगुणसम्पन्नोऽसि।

विद्यासागरः। एवं वक्तुं शक्यते भवता।

श्रीरामकृष्णः। लोकहिताय सत्त्वगुणप्रभवाणि तव कर्माणि। सत्त्व-गुणातिरेके दयादिगुणाः प्रभवन्ति। त्वं विद्यामन्नं च ददासि। फला-काङ्क्षारहितेन निष्कामकर्म्मणा (भगवदर्पणबुद्ध्या चित्तशुद्धिक्रमेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा) भगवत्साक्षात्कारो घटते। (तेन जन्मजरामरणजं भयं भवति जययोग्यम्)।

" ये तु स्वनामयशःपुण्याकाङ्क्षया कर्माणि कुर्व्वन्ति ते सकामा उच्यन्ते, न तु ते फलाकाङ्क्षारहिताः। अपि च त्वं सिद्ध एव।"

विद्यासागरः। कथम् ?

श्रीरामकृष्णः। पटोलालुके सिद्धे सती कोमले स्तः। तद्वद्धि तवात्यन्तकोमलतास्ति। यतस्तव एतावती दया सर्व्वभूतेषु।

विद्यासागरः। निष्पेषिते सिद्धे च सति माषे न याति तस्य काठिन्यम्; नतु कोमलता समायाति।

श्रीरामकृष्णः। नैवं त्वम्, यतो ये तु असिद्धा पण्डित इति नामधेया विवेकवैराग्यहीनाः कामकाञ्चनसक्तास्ते तु शकुनिवद् विचरन्त्यविद्यावति संसारे—यथा शकुनयोऽत्यूर्द्धं वियति उड्डयन्ते परन्तु तेषां दृष्टिर्निबद्धा पूतिगन्धमयस्थाने।

पुनश्च श्रीरामकृष्णो ब्रह्मसम्बन्धिनीं कथां कथयति।

श्रीरामकृष्णः। धर्म्माधर्म्मज्ञानाज्ञानसुखदुःखेच्छादिकं भूतभौतिकभावाभावरूपं कार्य्यात्मकं जगत्। त्रिगुणात्मकत्वाच्चास्य भवति धर्म्माधर्म्मवैलक्षण्येन सुलभः शुभाशुभसमावेशः। प्रोक्तधर्म्मादेरन्तःकरणधर्म्मतया अन्तःकरणपरिच्छिन्ने चैतन्ये जीवाख्ये च तेषामध्यासात् जीवः कर्त्ता सुखी दुःखीति भवत्यज्ञानकृतो मिथ्याव्यवहारः।

"ब्रह्मणि तु सच्चिदानन्दे नाज्ञानलेशावकाश इति न तत्कार्य्यस्य शुभाशुभादेरन्वयः कदापि। (तथाचोक्तम्—सूर्य्यो यथा सर्व्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः। एकस्तथा सर्व्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः॥)

"यथा मध्यस्थः प्रदीपः—तत्सन्निधौ कश्चिद् भागवतादिकं पठति, कश्चित् परप्रतारणार्थं चेष्टते। नहि तेन शुभाशुभकर्म्मणा प्रदीपो बद्धः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्वत् साक्षी उदासीनो मध्यस्थ इति निर्लेप एव"। "यद्यपि मायाधिष्ठानं ब्रह्म तथापि तया नैव लिप्तम्। यथा सर्पः स्वनिष्ठेन विषेण नोपलिप्यते तस्य विषकार्य्यं मरणादिकं च न भवति तद्वत् मायया अणुमात्रमपि ब्रह्म न सम्बध्यते।" (१)

"अपि च यतः अवाङ्मनसगोचरं ब्रह्म अतोऽनुच्छिष्टं हि तत् सर्व्वतत्त्वातीतत्वात् करणग्रामेण प्रकाशयितुमशक्यमिति।"

"वेदपुराणतन्त्रमीमांसादिचतुर्द्दशविद्या-स्थानानि उच्छिष्टतामापुः। नैव ब्रह्म उच्छिष्टं, तस्मादवाङ्मनसगोचरं ब्रह्म।"

(ज्ञानादेर्विशिष्टविषयकत्वेन निर्विशेषं ब्रह्म प्रमाणविषय इति सर्व्वव्यवहारातीतम्।)

विद्यासागरः। (अनुच्छिष्टं ब्रह्मेति वाक्यं श्रुत्वा विस्मयेन तत्रत्यान् प्रति) शिक्षिताद्य नवीना काचन हितवाणी।

(क्रमशः)

—०—

१। अयमाशयः—अविद्यादेस्तच्छक्तिविशेषतया तन्निष्ठत्वेऽपि तदनतिरेकात् "सदेव सौम्येदमग्र आसीत्"—इत्यादिना तत्प्रतिपादनात् अतिमहतो ज्ञानस्याश्रयाभावेन सहावस्थानाभावेन च अज्ञानस्य परिच्छिन्नस्य न ज्ञानावरकत्वं सम्भवति। अत एव न ब्रह्मण्यज्ञानसम्बन्धः। किन्तु जीव एव इति केचिद् वदन्ति।

संस्कृत-साहित्य-परिषत्, श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकत्रयम् ३)
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.
Printed at the Calcutta Oriental Press, Ltd.,
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
महामहोपाध्याया-
नन्तकृष्णशास्त्री
सहकारिसम्पादकः—
श्रीजानकीनाथ-
शास्त्री

भारते भातु भारती

संस्कृत-साहित्य-
परिषदो मासिकं
मुखपत्रम्

15—माङ्खेय शाखा (गी—14-1, 2, 9, ...)
26—यास्क श्रुति (गी—16-18,)
17—प्राचीनशाल श्रुति (गी—18-1.)
18—बृहत्संहिता (... 1-2-11.)

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

August, 1944. } १८६६-शकीये श्रावणे २७श-वर्षस्य ४र्थ-संख्या { Vol. XXVII, No. 4.

उपनिषत्प्रामाण्यचर्चा

(पूर्वानुवृत्तम्)

[निबन्धकः—मः मः श्रीअनन्तकृष्ण शास्त्री]

अहंब्रह्मास्मीत्यादौ अहमर्थस्तु तुरीयात्मस्वरूपमेव ननु ततोन्यदिति-निरूपणा र्थमेवकौषीतक्युपनिषदः इन्द्रप्रतर्दनाख्यायिका, इति निरूपणार्थमेव इन्द्रप्रतर्दनाधिकरणँतेनहिज्ञेयात्मस्वरूपनिरूपणप्रसङ्गत्वमहमादि पदानां तत्तद्वक्त-श्रोत्रादि स्वरूपं नार्थः किन्तु ततोतिरिक्तं तुरीयमेवस्वरूपमर्थ इति प्रतिपाद्यते । अयश्चन्यायः नोपनिषत्स्वेव किन्तु भगवद्गीतादौ श्रीगोता-दावन्यत्रच पौराणिकेषु प्रकरणेष्वनुसन्धेयः । अहं ब्रह्मास्मीत्यादि सामानाधिकरण्यं तत्तन्मतानुगुनं सत्यं न विरुद्धम्, तथापि स्वारस्यं कुत्रमन्त्रे इति विचारस्तु यथावसरं विशदीभविष्यति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीभाष्यसम्प्रदायिनां दशोपनिषदतिरिक्तः शतोपनिषदन्तर्गताश्च प्राधान्येन मूलतयाऽभिमताउपनिषदस्तु। (१) श्वेताश्वतरोपनिषद्यत्र तत्वत्रयं चिदचित्प्रकारकमेकं तत्वञ्च प्रतिपाद्यते। (२) नारायणोपनिषद्—"अथ पुरुषोवै" इत्युपक्रान्ता (यत्रतत्परमं तत्वं नारायणनवेति प्रतिपाद्यते) (३) अपरा नारायणोपनिषद् "अम्भस्यपारे" त्युपक्रान्ता। (४) सुबालोपनिषद् यत्रसर्वेषां परमात्मशरीरत्वं [illegible] पत्रिपाद्यते

[illegible] प्रकाशयितुमशक्यमिति।"

"वेदपुराणतन्त्रमीमांसादिचतुर्दशविद्या-स्थानानि उच्छिष्टतामापुः। नैव ब्रह्म उच्छिष्टं, तस्माद्वाङ्मनसगोचरं ब्रह्म।"

(ज्ञानादेर्विशिष्टविष[illegible] विषय इति सर्व-

[illegible] भारतञ्चैव पञ्चरात्रमथाखिलं।
मूलरामायणञ्चैव पुराणञ्चैतदात्मकम्॥
येचाऽनुयायिनस्तेषां सर्वेते च सदागमाः।
दुरागमास्तद्रव्ये ये तैर्नज्ञेयो जनार्दनः॥

इति विष्णुतत्वविनिर्णय वचनात् ऋगादि श्रुत्यादीनेव प्रमाणतया मन्यन्ते। नतेषांहि मते उपनिषदां पृथक् स्वतन्तसिद्धान्तस्थापकत्वं न स्वीक्रियते। नतः स्वमतोपष्टम्भकतया कुत्राप्यन्यत्राऽप्रसिद्धा :—

1—पिप्पलादि शाखा (गो—8-9 ब्र—1-4-1, 1- 4-2.)

2—बाभ्रव्य शाखा (गी—9-1, 10-25, 11-13, 11-19.)

3—वारुण शाखा (3-11-19.)

4—ऋग्वेदखिल (गी—10-42, 11-12, 11-17, 12-2, 17-24, 17-26, 18-18.)

5—शाण्डिल्य शाखा (गी 11-16.)

6—गौतमखिल (गी 11-19.)

7—आग्निवेश्य शाखा (गी—12-1, 17-17-5.)

8—सौकरायणश्रुति (गो-12-2, 5, 6, 13-24, 14-1.)

9—काषायणश्रुति (गी—12-2, 8, 16-1.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

10—गोपवन शाखा (गो—12-2, 13-25.)

11—अनभिम्लान शाखा (गो—12-8, 14-1, 17-5.)

12—अयास्य शाखा (गो 3-24,)

13—मातुच्छन्दसः श्रुति (गो—13-24, 17-1.)

14—शार्कराक्षः श्रुति (गो—14-1, 2, 9, 15-16.)

15—भाल्लवेय शाखा (गो—14-1, 2, 9, 15-16. ब्र—1-1-1.)

26—यास्क श्रुति (गो—16-18,)

17—प्राचीनशाल श्रुति (गो—18-1.)

18—बृहत्संहिता (ब्र—1-1-1, 1-1-4. 1-2-11.)

19—पैङ्गि श्रुति (ब्र—1-1-10, 1-2-12.)

20—चतुर्वेदशिखा (ब्र—1-1-14, 1-1-20, 1-2-14.)

21—ह्रन्द्रद्युम्न शाखा (ब्र—1-2-5.)

22—वाराहसंहिता (ब्र—1-4-29.)

प्रभृतयः सूत्रगीतादि प्रस्थानेष्युदाह्रियन्ते । एतासां सर्वासान्तु उपनिषत्वे न प्रमाणंदृश्यते न वाशतोपनिषत्सु नवाष्टोत्तरशतोपनिषत्स्वन्तर्गमोदृश्यते । त्रतासांश्रुतीनां तत्तच्छाखास्वपि ब्राह्मणभागेऽन्तर्गमः उतमन्त्रभागे इति नैवतावतापिज्ञायते । अध्ययनाध्यापनसम्प्रदायोऽपि नैतासां शाखानां कुत्रापिवर्तते. इतितु न दुरपह्नवं तत्वम् ।

सर्वमतसम्मतं प्रामाण्यन्तु इशकेनादीनां दशोपनिषदां श्वेताश्वतरोपनिषदश्च तत्र तत्र स्वस्वसिद्धान्तोपष्टम्भकतया वर्त्तते, इति ईशाद्युपनिषदमेकैकामधिकृत्य मतत्रयस्य तत्रस्थानं किं इति विचार एवसाम्प्रतमवसरप्राप्तः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जैनदर्शने सांख्यादिदर्शनसाम्यम्

(पूर्वानुवृत्तम्)

[निबन्धकः—श्रीआशुतोषन्यायाचार्य्यः]

एवं क्षेत्रम्—अधिकरणम्, पुस्तकञ्चस्वाधिकरसम्बन्धितया सत्, पटाद्यधिकरणसम्बन्धितया च पुस्तकमसत्। एवं पुस्तकं स्वकाले सत्, स्वाभावकालापेक्षया च पुस्तकमसत्। एवं भावो—धर्मः, स च पुस्तकस्य पुस्तकत्वादिः, तेन पुस्तकत्वादिरूपेण पुस्तकं सत्, परकीयधर्मपटत्वादिरूपेण च पुस्तकमसत्, तेन पुस्तकस्य सद्रूपत्वमसद्रूपत्वञ्चास्ति।

एवं सत्त्वप्रमेयत्वादयः सर्वेषां वस्तूनां धर्माः सर्वेभ्योऽभिन्नाः, तादृशसत्त्वप्रमेयत्वादयश्च पुस्तकतोऽप्यभिन्नाः, अतः सर्वाभिन्नसत्त्वप्रमेयत्वाद्यभिन्नतया पुस्तकस्य सर्वरूपत्वमस्ति। तेनैतत् सिद्ध्यति यत् "पुस्तकस्य। न केवलं पुस्तकरूपत्वमपितु अनेकरूपत्वं विद्यते। एवं रीत्या सर्वेषां वस्तूनां कथञ्चित् सर्वरूपतया जगदिदं भेदाभेदमूलकमनेकान्तात्मकत्वं विभर्त्तीति"।

अस्मिन् जैनदर्शने यत्र विषयेषु प्राधान्येनेतरदर्शनप्रतिपादितविषयसाम्यं दृश्यते तत् संक्षेपेणालोचनीयम् तत्र प्रथमतः साङ्ख्यदर्शनेऽप्येतद् भेदाभेदमूलकमनेकान्तात्मकत्वमंशतो दृश्यते।

तथाहि—साङ्ख्याचार्याः कार्यकारणयोरभेदं स्वीकुर्वन्ति। यथोक्तमीश्वरकृष्णकृतसाङ्ख्यकारिकायां "कारणभावाच्च सत् कार्य मि"त्यादि (९म का०)। तेषामयमाशयः,—यथाहि अत्यन्तासद् गगनारविन्दादि कथमपि सद्भावं नासादयति, तथैव यदि घटादयोऽपि उत्पत्तेः पूर्वमत्यान्तासन्तोऽभविष्यन् तदा तद्वदसद्भावाविशेषात् कदापि ते सद्भावं नासादयिष्यन् अतः उत्पत्तेः पूर्वमपि कार्यं कारणरूपेण सदेव। विलक्षणपरिणामविशिष्टं कारणमेवकार्य्यमित्युच्यते, तादृश परिणामरहितं तदेव कारणमित्युच्यते। यथा तन्तवो विलक्षणसंयोगविशिष्टाः सन्तः पट इत्युच्यन्ते,त एव पृथगवस्थितास्तन्तव इत्युच्यन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतः कार्यकारणे अभिन्ने इति। सूत्रवस्त्रयोरभेदे सूत्रकार्य्यं पटेन, पटकार्यञ्च सूत्रेण कथं न सम्पद्यते ? तथा सूत्रमेव पटः, पटएव सूत्रमिति वा कुतोन व्यवह्रियते ? यद्युभयोरेकत्वं तर्हि उभयकार्यमेव प्रत्येकेन स्यात, वस्तुस्थित्या तन्न भवतीत्यतः सूत्रपटयोर्भेद एवावश्यमङ्गीकार्य इति नाशङ्कनीयम् । यतः सूत्रपटयोरभेदएव, भेदः कथमपि नास्त्येवेति नाङ्गीक्रियतेअपि, तु कथञ्चिद् भेदोऽप्यस्ति । यथा प्रत्येकसूत्रतो भिन्नतया वस्त्रं नोपलभ्यतेऽतो वस्त्रसूत्रे अभिन्ने, तथा प्रत्येकं सूत्रेण वस्त्रकार्यं नसम्पद्यते प्रत्येकञ्च सूत्रे वस्त्रव्यवहारो न भवतीत्यतो वस्त्रसूत्रे भिन्ने अपि। एवञ्च कथञ्चिद्भेदसत्त्वात परस्पर कार्यं परस्परेण न सम्पद्यते, न वा परस्परव्यवहारोऽपीति ।

न चैतन्मन्तव्यम् यदेतादृशभेदाभेदौ साङ्ख्याचार्याणामसम्मताविति। यतः ईश्वरकृष्णस्य नवमकारिकातत्त्वकोमुद्यां षड्दर्शनेटीकाकृद्भिर्वाचस्पतिमिश्रैरभाणि यत "स्वात्मणि क्रियानिरोधबुद्धिव्यपदेशार्थक्रिया व्यवस्थाभेदाश्च नैकान्तिकं भेदं साधयन्ति" इति ।

तदर्थश्च क्रिया—उत्पत्तिरूपा, निरोधी—नाशस्तिरोभाव इति यावत । बुद्धिः—इदम वस्त्रम् इमे तन्तद्रवइत्येतादृशो बोधः, व्यवहारः—इदं वस्त्रम् इमे तन्तव इत्यादिशब्दप्रयोग—अर्थः रूपः प्रयोजनम् क्रिया—प्रावरणसीवनादिरूपा । एषां व्यवस्थाभेदाः—नियमविशेषाः ऐकान्तिकम् एकपाक्षिकम् अभेदासहिष्नुम् भेदं नसाधयन्ति नानुमापयन्तीति । तेनैतदध्यवसीयते । यदेते सर्वथाभेदं नसाधयन्ति अपितु कथञ्चिद्भेदमेवेति ।

केचन टीकाकारिणो नैकान्तिकं भेदं साधयन्तीत्यस्य पारमार्थिकं भेदं न साधयन्तीत्यर्थस्तेनैते व्यावहारिकं भेदं साधयन्ति पारमार्थिकं भेदं न साधयन्तीति निषकर्षः इत्याहुः। तन्नसमीचीनम्मन्महे यतोऽयमर्थो वेदान्तिनां सम्मतोऽपि साङ्ख्यसम्मतत्वं न पुष्णाति । वेदान्तिनो हि पारमार्थिकव्यावहारिकप्रातीतिकभेदेन त्रिविधं सत्त्वं मन्वते, तदनुसारेण भेदोऽपि तथा भवितुम मइति, साङ्ख्यानां तथा स्वीकारस्य निष्प्रयोजनत्वात ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च प्रकृत्यादिभूम्यन्तानां सर्वथाभेदराहित्ये प्रकृत्यादीनां विभागो व्यक्ताव्यक्तादिविभागश्च न स्यात। विभागो हि विरुद्धधर्मपुरस्कारेणैव भवति, विरोधश्च भेदनियतः, तदभावे कथं विभागः स्यात।

न च प्रकृत्यादिविभागोऽपि व्यावहारिक एव न तु पारमार्थिक इति वचनं साम्प्रतम् तथा "प्रपञ्चप्रत्ययश्चासतिसतिबाधके न शक्यो मिथ्येति वदितुमिति" एततकारिकाव्याख्यानोप्रक्रमान्तर्गतवाचस्पतिवचनस्य तथा "प्रकृतित्वञ्च तत्त्वान्तरोपादानत्व" इत्यादि बहु ग्रन्थस्यासङ्गतत्वापत्तेः!

अन्यच्चैकान्तिकशब्दस्य स्वारसिकोऽर्थ एकपाक्षिक इति यतः पक्षार्थकोऽन्तशब्दस्तदर्थे एव न्यायभाष्यकारवात्स्यायनप्रभृतिभिरप्येषोऽन्त शब्दोऽभ्यधायि। यथा न्यायदर्शन प्रथमाध्याय द्वितीया ह्निकपञ्चमसूत्रभाष्ये "नित्यत्वमप्येकोऽन्तः अनित्यत्वमप्येकोऽन्तः, एकस्मिन्नन्ते वर्त्तत इतैकान्तिकः" इति। अत्रान्तशब्दः पक्षार्थ एव विद्यते। तदयमेकपाक्षिक इति स्वारसिकार्थो न युज्यते हातुम्। वस्तुतस्तु परिणामवादिनां साङ्ख्यानां मते कार्यकारणयोः सर्वथा भेदाभावे परिणाम एव न स्यात पूर्वावस्थापरित्यागेनावस्थान्तरग्रहणरूपपरिणामस्यावस्थाभेदाभावेऽसम्भवात अवस्थाभेदे च, अवस्थावतोऽपि कथञ्चिद्भेदस्या वश्याकत्वात।

तेनैतदाभाति यत् साङ्ख्यानामपि कार्यकारणादीनां कथञ्चिद् भेदाभेदौ इष्टौ, भेदस्यच कार्याभिन्नकारणानुमाने—प्रकृत्यादिसिद्धौ अनुपयोगितया-प्राधान्येनाविवक्षेति।

एवञ्च भेदाभेदाधीन सदासत्वादिरूपेणानेकान्तात्मकत्वमंशतः साङ्ख्यदर्शनसम्मयतं। तच्च जैननर्शने प्रधानतयोपलभ्यते।

एवं व्यावहारिक तया घटादेः सत्त्वं तथा पारमार्थिकरूपेण चासत्त्वमादाय वस्तूनामनेकान्तात्मकत्वं वेदान्तदर्शनसम्मतमप्युपलभ्यतेऽत्र।

तथैतदुभयदर्शनसम्मतः कार्यकारणाभेदो गुणगुणिनोरभेदस्तथा क्रिया क्रियावदभेदश्च जैनदार्शनिकैः स्वीक्रियन्ते। विशेषस्त्वत्र इमौ भेदाभेदो सार्वत्रिकौ, सद्रूपतया सर्वेषामभेदात तत्तद्व्यक्तित्वेन रूपेन च सर्वेषां भेदात।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साङ्ख्यादौ तु कार्यकारणगतावेव, प्रकृतिपुरुषयोस्तु अभेदस्तैः कथमपि नाङ्गीक्रियते इति। एवं साङ्ख्यादि सम्मतं सर्वदा परिणामित्व मपि वस्तूनां जैनाचार्यैरभ्युपगम्यते, विशेषस्तु साङ्ख्याचार्यैः प्रकृतेस्तथाऽप्राकृतवस्तूनामेव सर्वदा परिणामित्वमात्मनश्चापरिमोऽभ्युपेयते यथोक्तं वाचस्पतिमिश्रैः "प्रतिक्षण परिणामिनोहि सर्व एव भावा ऋते चितिशक्तेः" रिति। जैनमते तु आत्मानात्मनां सर्वेषामेव प्रतिक्षण परिणामित्वं पदार्थमात्रस्यैव उत्पादव्ययध्रौव्यशालित्वलक्षणत्वात "उत्पादव्ययध्रौव्ययुक्तं सदि"ति तत्वार्थसूत्र (५ म०अ० ३०सू०) वचनात्। आत्मनोऽपि ज्ञानेच्छादि क्षणिक पर्यायरूपेण परिणामोभवतीति तदुक्तम् "चैतन्यास्वरूपः परिणामी कर्त्ता साक्षाद् भोक्ता स्वदेहपरिमाणः प्रतिक्षेत्रं भिन्नः पौद्गलिकादृष्टवांश्च" इति (प्रमाणनयतत्वालोकालङ्कारः ७ म० प० ५६ सू०)

न्यायवैशेषिकदर्शनयोः परमाणुवाद आरम्भवाद ईश्वरवादो ज्ञानादीनामात्मगुणत्ववादादयश्च प्रधानविषयाः। तेषु परमाणुवादं ज्ञानादीनामात्मगुणत्ववादमादाय च जैनदर्शनमनयोः साम्यं विभर्त्ति। विशेषास्तु जैनदर्शने शब्दस्याप्याणविकत्वम् यथोक्तम् प्रमाणनयतत्त्वालोकालङ्कारे "अकारादिः पौद्गलिकोवर्ण" इति (पुद्गलोऽणुः)। नैयायिकादिभिर्धर्माधर्मौ आत्मगुणत्वेन, साङ्ख्यादिभिश्च बुद्धिधर्मत्वेन, स्वीकृतौ जैनैस्तु द्रव्यत्वेन स्वीकृतौ यथोक्तम् "अजीवकायाधर्माधर्माकाशपुद्गलाः।" "द्रव्याणिजीवाश्च" तत्वार्थसूत्रे ५ अ० १२ सू०) धर्मादि चतुष्टयं जीवाश्चेति पञ्चविधानि द्रव्याणि भवन्तीति सूत्रार्थः। तथा प्रमाणनयतत्त्वालोकालङ्कारात्मसत्रे (७ प० ६ सू०) पौद्गलोकादृष्टवांश्चेत्यादि।

जैनमते अनन्तवीर्यशालिनोऽनेके ईश्वरा—सर्वज्ञाः सन्ति न तु तेषां जगत कर्त्तृत्वम्। जीवात्रव सम्यगदर्शन, सम्यग्ज्ञान, सम्यक्चारित्रैः सार्वज्ञयं लभन्ते। जगत कर्त्तातु कोऽपि नास्ति। जगद अनादि, स्वभावजन्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गौतम काणाद साङ्ख्यादि दर्शनेषु आत्मासर्वगतो निष्क्रिय इति सिद्धान्तः, जैनमते चात्मा शरीर परिमाणो देहस्य ह्रासवृद्धिभ्यां ह्रासवृद्धी प्राप्नोति ।

ज्ञानादीनामात्मगुणत्वं मन्वान अपि एते तेषामात्मपरिणामत्वं स्वीकुर्वन्ति ।

नैयायिकादिभिः पृथिव्यप्तेजोवायुषु गन्धरसरूपस्पर्शानां क्रमह्रासोऽभ्युपेयते जैनैस्तु सर्वेष्वेक गन्धादयः सर्वेगुणाः स्वीक्रियन्ते । यथोक्तम्— तत्त्वार्थे स्पर्शरसगन्धवर्णवन्तः पुद्गलाः ! (५ म० अ० २६ सूद०) एषाम्मतेशब्दोऽपि पौद्गलिकत्वाद् गन्धादिगुणयुक्त एव शब्देचेषामनुपलब्धिरनुद्भवेनेति ।

अद्वैतवादिनां जगतः सद्ब्रह्मरूपतया एकत्वमभुमतम् । जैनैरपि सद्रुपतया जगत एकत्वमनुमन्यते यथोक्तम् प्रमाणनयतत्वालोकालङ्कारे "विश्वमेकं सदविशेषादिति यथा" (७ प० १६ सू०) ऐकान्तिकमेकत्वन्तु नानुमन्यत इति ।

तथात्मनः स्वप्रकाशत्वमादायापि वेदान्तिमतसाम्यमत्र । एवम् अभावस्याधिकरणरूपतामादाय मीमांसकमतेन तथा वेदान्त्यादि मतेन च साम्यमत्रास्ति ।

तथा बौद्धदर्शनेन सह सर्वेषां वस्तूनां क्षणिकत्वमादाय साम्यं जैनदर्शने दृश्यते । विशेषस्तु बौद्धैः कथमपि कस्यापि वस्तुनः स्थिरत्वं नाभ्युपगम्यते । जैनैस्तु द्रव्यत्वादिरूपेणसर्व्वेषां वस्तूनां स्थिरत्वंतत्तत् पर्यायरूपेण च क्षणिकत्वमप्युररीक्रियते ।

एवम् चार्वाकदर्शनेनात्मनः शरीरपरिमाणत्वं तथात्मनः कथञ्चिच्छ्रीराभेदमादाय साम्यं दृश्यते इति संक्षेपः ।

संस्कृत-साहित्य-परिषत्, वार्षिकमूल्यम्—रूप्यकत्रयम् ३)
श्यामबाजार, कलिकाता । Foreign price—7s.
Printed by Dinabandhu Sahityashastri at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 17 R. G. Kar Road, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
महामहोपाध्याया-
नन्तकृष्णशास्त्री
सहकारिसम्पादकः—
श्रीजानकीनाथ-
शास्त्री

संस्कृत-साहित्य-
परिषदो मासिकं
मुखपत्रम्

भारते मातु भारती

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

September, 1944. | १८६६-शकीये भाद्रे २७श-वर्षस्य ५म-संख्या | Vol. XXVII, No. 5.

श्रीरामकृष्णोदारकथाप्रसङ्गः

(पूर्वानुवृत्तः)

[निबन्धकः—स्वामी जगन्नाथानन्दः]

श्रीरामकृष्णः । श्रूयतामाख्यायिका । कस्यापि द्वौ पुत्रौ स्तः । आर्य्यसंस्कृत्या संस्काराश्रमाद्यानुकूल्याय पित्रा वेदाध्ययनार्थं तौ प्रेरितौ गुरुकुलम् । तत्र यावत् कालमुषित्वा वेदाध्ययनानन्तरं स्वगृहमागत्य पितरं प्रणेमतुः । पिता तयोः शिक्षापरिचयार्थं पप्रच्छ । हे कुमारौ गुरुकुले स्थित्वा युवाभ्यां वेदा अधीताः । कीदृशी ब्रह्मविद्या समाधिगतेति श्रोतुमिच्छामि । वदतम्, किंस्वरूपं ब्रह्म ? तत् श्रुत्वा ज्येष्ठपुत्रो वेदेभ्यो बहून् श्लोकान् उद्धृत्य ब्रह्मस्वरूपं ज्ञापयामास ।

(स एष नेति नेतीत्यात्माऽगृह्यो नहि गृह्यते । सत्यं ज्ञानमनन्तं ब्रह्म इत्यादिकम्) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"कनिष्ठपुत्रः पितुर्वचः श्रुत्वा ज्ञात्वापि किमपि न बभाषे—मौनी तस्थौ। कुमारं तूष्णीम्भूतं दृष्ट्वा प्रसन्नः पिता तमिदमुवाच। तात! त्वया किञ्चिज् ज्ञातं ब्रह्मस्वरूपम्। यस्यामतं तस्य मतं मतं यस्य न वेद सः। मौनमपि लक्षणं ब्रह्मविदः। परन्तु प्राकृता जना ज्ञानार्थमप्रयतमाना अहङ्कारेण वदन्ति"—'वयं सर्व्वज्ञा इति'।

"यथा काचित पिपीलिका शर्कराकणमेकं भुक्त्वा कणान्तरं संगृह्य गच्छन्ती शर्कराशैलमतः परं नेष्यामीति कल्पयति। तथैव हि अज्ञानां ब्रह्मणि कल्पना"।

"भवन्तु नाम चरमपदाधिरूढ़ा नियन्तारः शासकाश्च मानवादयो ब्रह्मादयो वा तथापि तं ज्ञातुं नार्हन्ति। यतः स हि ईश्वराणां पतिः पतीनां नियन्ता नियन्तृणां शासकः शासकानाम्"। तदु नात्येति कश्चन, कोऽद्धा वेद इत्यादिका श्रुतिरस्य दुर्ज्ञेयतां वक्ति'।

"स्यादेतत, तर्हि वेदपुराणादिषु या ब्रह्मप्रतिपादिका उक्तयस्ता कीदृश्यः स्युः? श्रूयताम्—कश्चित दृष्टसागरं पुरुषं पप्रच्छ। अये, कीदृशो दृष्टः सागरः। तत्स्वरूपं प्रबोधय माम्। विस्मयेन द्रष्टा पुरुषो ज्ञापयामास। अहो! 'स हि जलनिधिरत्युच्चैस्तरङ्गभङ्गः प्रचुरकलनादश्च। अद्भुतो हि सः। उदधेर्नैव वाच्यमपरं किञ्चित्"। 'उक्तं च नहि ते ते असाधारणा धर्म्मा अनुभूयमाना अपि शक्या वक्तुम्। न खल्विक्षुक्षीरगुड़ादीनां मधुररसभेदाः शक्याः सरस्वत्याप्याख्यातुम्'। "तद्वद्धि शास्त्रवाक्यानि यथाकथञ्चिदर्थप्रतिपादकानि भवन्ति प्रायशः। सगुणनिर्गुणब्रह्मप्रतिपादिकास्ता वाचः परोक्षं बोधयन्ति। परोक्षं हि शास्त्रज्ञानम्"।

"शुकदेवादिमहर्षयो ब्रह्मसागरवेलायां दण्डायमानास्तद्दर्शनं तत्स्पर्शनं चाकुर्व्वन। नतु ते सच्चिदानन्दसागरे प्रविष्टा इति केचित्। सच्चिदानन्दसागरं प्रविष्टस्य पुनरागमनं न सम्भवति। समाधिना ब्रह्मसाक्षात्कारी घटते। तस्मिन्नखण्डबोधात्मनि निर्व्विकल्प समाधिविषये सति सर्व्वकल्पनारहिता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बिचारबर्ज्जिता तूष्णीमवस्था भवति। ब्रह्मस्वरूपं वक्तुं न शक्यते कैरपि"। 'ब्रह्मविद्ब्रह्मैव भवति, तत् केन कं पश्येत्, तत् केन कमभिबदेत् इत्यादिश्रुतिसहस्रं तत्र प्रमाणम्।

"यथा एकदा काचित् लवणपुत्तलिका कियद् गाम्भीर्य्यमर्णवस्य इति परिमातुमर्णवं प्रविष्टैव तत्र विलीना लवणाम्भोधौ। तस्या रिलयस्तु "नाशः कारणलय" इत्याद्यनुशासनविधया तस्याः पृथक् सत्त्वाभावे को ज्ञापयिष्यति पारावारस्य।

गाम्भीर्य्यं"। कश्चिप् भक्तः समाधिमन्तः पुरुषा ब्रह्मज्ञास्ते किं भाषां न भाषन्ते ?

श्रीरामकृष्णः। नह्येष ममाशयः। सदात्मस्वरूपोपलब्धिस्तदा भेदधियोऽभावात् विचारो न सम्भवतीत्यर्थः। समाधो वृत्ति शून्यत्वेऽपि उत्थाने विद्यावृत्तिर्भवति महापुरुषाणां। "यथा शङ्कराचार्य्यादयो लोकहिताय विद्यावृत्तिमवलम्बड ब्रह्मविद्यं शोके प्रचारामोमुः खावन्त ब्रह्मासाक्षात कारस्तावद् विचारण बुद्धिः। यथा इद सद् इदमसद् इदं ण्यम् इदं पापम्"।

"यावद्परिपक्वं हविस्तावदेव तस्य सुरचुरध्वनिः। परिपाके तु नैवं शब्दः तद्वत। अपितु, तप्तकटाहस्थितपरिपक्वंहविषा गोधूम पिष्टकं (लुचि) पक्तताप्तये यथा विनदति ब्रह्मात्मनैव तिष्ठताऽपि विदुषाअज्ञं ज्ञानवन्तं विधातं स्तथा शब्देते"। "अन्यद् यथाद्विरेफा यावत् पुष्पेभ्यो मकरन्दं न पिबन्ति तावत तेषां गुञ्जनानि भवन्ति नतु पानवेलायाम्। -अपितु कदापि मधु पिबन्तस्ते परमानन्देन गुञ्जन्ति"।

"यथा वा जलपूरणसमये कुम्भत् भग्भग् ध्वनिर्जायते पूर्णंतु नैव शब्दः। अपितु पूर्णकुम्भात कुम्भान्तरापूरण दशायां पुनः शब्दो भवति।"

"तद्वत हि नित्यशुद्ध मुक्तस्वभावा अपि ज्ञानिनो जगत काल्याणय विद्याप्रवर्त्तनाय ज्ञानदानायच आचरणभाषणशरीरधारणानि कुर्व्वन्ति नैवान्यत प्रयोजनं किञ्चिदस्ति तेषाम्"।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतनाटकानि

(पूर्वानुवृत्तानि)

[ग्रन्थकर्ता—वि. कृष्ण स्वाम्ययङ्गार्यः सुभाषिणीसम्पादकः,
श्रीचामराजेन्द्र संस्कृतमहापाठशाला, कल्याणपुरी]

परन्तु तस्मिन्प्राचीनकाले पाश्चात्त्येष्वन्ध विश्वासस्य प्राबल्यमत्यधिकमासीत, यतो हिरोडोटसः, "भारतीयानां पारीचेते कस्मिंश्चित्पौरस्त्ये मरुप्रदेशे जम्बूकेभ्योऽपि स्थूलकायाभिः पिपीलिकाभिः खनितायां भूमौ सुवर्णमधिकं लक्ष्यते, तदेव च पारसीकाय चक्रवर्तिने भारतीयैरुपाययनया प्रतिवर्षं प्रेक्ष्यते" इति व्यलिखत्। एवञ्चातिप्राचीनकाले ग्रीकादयः पाश्चात्या भारतभूमिं न प्रत्यक्ष तो ददृशुः, अपि त्वाधिकारिकै पारसीकैर्निवेदितान्विषयानेव श्रद्दधुरिति वितर्क्यतो एतावताऽलक्सान्द्रादपि प्राक् भारतीया नां परदेशस्थैःसाकं घनिष्ठरसम्पर्को बभूवेति निर्विवादम्। अलक्सान्द्रादनन्तरन्तु निष्कृष्टरूपेण पाश्चात्यानां सम्पर्कमवाप्य भारतीयानां साहित्यक्षेत्रमतीव वितस्तार। तथाहि। प्रथमत एव वाणिज्यादिनिर्वाह्यय भारतीयानामितरदेशीयानाञ्च परिचिता राजकीया भाषा प्रतिष्ठापितासीत। ग्रीकाश्च भारतभुवमुपागता साम्राज्याधिकारिणोऽपि जनतायां स्वभाषायाः प्रचारमशक्य मथिसन्धाय भारतीयानामेव भाषां व्यावहारिकीमुरी चक्रिरे। सम्पादिते च कथञ्चिदपि भाषाज्ञाने परस्परमभिप्रायविनिमयसौलभ्या ग्रीकाणां भारतीयानाञ्ज पण्डितानां कलाविदां कवीनाञ्चान्योन्य सम्पर्कसमवर्तत। अलक्सान्दरस्वयं रसिकानां शिखामरिभूत, येन दण्डयात्रायामपि सैनिकैःसाकं नाट्यविद्यापारदजनः कांश्चिदभिनेतृनानिनाय भारते च नटैरेभिर्बहूनि नाट्यानि यथावकाशमभिनीतानि। अलक्सान्द्रेण पराजिताश्च नृपतयस्तस्य वशंवदा नाटकान्यमूनि तेन साकं प्रेसाञ्चक्रिरो बहवश्च भारतीयाः कलाप्रिया अदृष्टपूर्वमभिन कौशलमवेक्ष्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नटानीदृशाननुकर्तुं कामासमजायन्त। ग्रीकाणामागमनात्प्राक् भारते न नाटकानि निरमीयन्त, न वा नाट्यशालानां संविधानमाद्रियत। नाटकानामभावेऽपि नाट्यशालानां गात्रविक्षेपापरपर्यायस्य नृत्तस्य प्रदर्शनायोपकल्पितासम्भाव्येरन्। परन्तु ग्रीकाणां निकटसम्बन्धस्य प्राप्तेः पूर्वमीदृशो नाट्यशालाऽपि भारतदेशे नासीद्वा नाटकाभिनयेन सामाजिकानामन्यादृशोमानन्दोत्पत्तिमवेक्ष्य भारतीयाः साधुविषयसंग्रहणशीला ग्रीकेभ्यो नाट्यविद्यामभ्यस्यन्तिस्म। तेषामेव रचनाक्रममनुसृत्य स्वयं नाट्यशाला अपि निरचयानासुः।

प्रयोगार्थानि नाटकान्यपि बहूनि विरचयामासुः। तस्माद्ग्रीकसम्पर्कादेव भारतीय नाटकानामुत्पत्तिरिति विनिर्णयसाधीयानेव। कथमन्यथा भारतीयैरादौ पौराणिकान्येवेतिवृत्तानि नाटकेषु कथावस्तुतयोपाद्यन्त। कल्पनाशक्तिदारिद्र्यादेव भारतीयाः कवयस्तादृशं कथाचौर्यमकार्यमातन्वन्तेति न वाच्यम्। कल्पनाशक्तिविहीनानां कवित्वस्यैवासम्भवात्। पुराणोपात्तास्वपि कथासु रसानुगुण्येन विपर्यासकरणाच्च तेषां काल्पनिकमनोवृत्तिरेव नासीदित्यभिधानानौचित्यात्? दुष्यन्तस्य पात्रचित्रणावसरे धीरोदात्तत्वपरिरक्षणाय मूलग्रन्थेष्वनुपन्यस्तोऽपि दुर्वाससः शापः कालिदासेन न कल्पितः किम्? शकुन्तलायाः पत्नीत्वेन परिग्रहणं स्मरत्यपि प्रत्याचक्षाणे दुष्यन्ते भगवत्प्रेरणया काऽप्याकाशवाणी शकुन्तलापरिनयवृत्तान्त स्मारयामास। ततश्च दुष्यन्तो गुरुनिन्दाभीतोऽपि प्रतिकारान्तर विरहात्पर्यग्रहीच्छकुन्तलामिति मूलकथायामस्वारासेकत्वमुपलक्ष्यता कविना मेनकया शकुन्तलानयनं कल्पयित्वा राज्ञः स्वाङ्गुलीयकदर्शनाच्छापावसाने प्रत्यभिज्ञातप्रणयकथस्य चिरकालवियोगदुःखानुभवानन्तरमार्चन्ति तोपनतरीत्या काक तालीयन्यायेन शकुन्तलासमागमोऽपि नाटकस्य रामणीकमतिशाययितुं स्वयमुपकल्पित एव। एवमितिवृत्तव्यत्यासस्तावद्भारतीयानामपि कल्पनासम्पत्तिमधिव्यञ्जयति।

कथमन्य था मेघदूतादीनां विमान्यानां काव्यानां निर्माणमुपपद्येत?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा च पुराणकथोपादाने कारणान्तरोपवर्णनमावश्यकमापन्नम्। तत्र ग्रीकसम्पर्क एव समुचितो हेतुरनुमीयते। तथा हि। ग्रीकनाटकाना-मितिहासं परिशीलयन्तो विद्वांसस्तेषु प्राधान्येन धार्मिको दृष्टिकोणो व्याख्यानमञ्जमवतारित इत्याभिप्रयन्ति। ग्रीकास्तावत प्रतिवर्षं वसन्ता-रम्भे "ऽयोनिसम्" देवतायाः पूजोत्सवं महता सम्भ्रमेण विजृम्भणेन च विरचयन्त आसन। मानवजातावुत्पन्नो हि जन्तुर्नानाविधैरूपायैरुदर-भरणं निर्वहन यत्रकुत्राप्युत्सवे भागं वहन सन्तोषाथिक्यादपगतचिन्तो नर्तनादिकेष्वानन्दप्रदर्शकेषु वैविध्य (Variery) प्रयोजकेषु च व्यापारेषु प्रवर्ततो तथैव ग्रीकेष्वापेनर्त नपद्धतिस्सर्वत्र प्रसृताऽसीदित्यनुमीयतो एतादृशे-नैकेननृत्येन "बालड् डान्स्" नामकेन ग्रीकनाटकाम्युदयद्यन्तेति निर्विवादम्। न च ग्रीकनाटकानामु त्पत्तिर्भारतीयानामादर्शमनुसृत्य सम्बभूवेति किन विमर्षव्यमिति वाच्यम्? यूरिपीडीसप्रभृती तिथी रुद्रनाटककारैः क्रि० पू० पञ्चम चतुर्थशतकयोरवतीर्णे भारतीयसम्पकीत्प्रागे व ग्रीकनाटककलायाः पूर्णरूपेण परिपोण्याभिवर्धनात। पारसीकानां सम्भूलेऽपि भारतसम्पर्के तस्मिन्काले ग्रीकैर्भारतदेशे पदानिक्षेपात। भारतीयास्तु न कुत्राटपि देशा-न्तरे स्वकीयमधि कारमस्थापयनित्ययः कथमप्यलक्सान्द्रात्पूर्वं भारतीयकाया ग्रीकेष्वसंक्रामत। यस्याग्रीकनाटकानामेव प्राचीनत्वात्तानि भारतीयैः प्रभावितानीति स्वीकर्तुं सशक्यत्वात। ग्रीकेषु ड्योनिसस्देवताटाधनस्यैव न्याय्यप्राप्तत्वात्तस्मिन्नेवावसरे नाट्यानामाविष्कारोऽपि वितर्क्यते। तास्मे-न्नुत्सवे प्रायः पञ्चाशत पूर्वपुरुषाणां वेषं धारयन्तस्तच्चरित्रवर्णनात्मकानि पद्यानि गायन्तश्य नृत्यन्तस्समतुण्यन। कालक्रमेण च तास्मेन्समाजे मुख्यः पात्रधारी वेदिकामुपारुह्य पात्रान्तरैस्साकमुपचक्रमे।

(क्रमशः)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Vol. XXVI] 1943-44

१८६५ शकाब्दस्य २६श वर्षस्य

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

महामहोपाध्याय-श्रीअनन्तकृष्ण-शास्त्री

सहकारि-सम्पादकः—

श्रीजानकीनाथ-शास्त्री

संस्कृत-साहित्य-परिषत्, वार्षिकमूल्यम्—रूप्यकत्रयम् ३)

श्यामवाजार, कलिकाता। Foreign price—7s.

Printed and Published by

Dinabandhu Sahityashastri

Sanskrit Sahitya Parishad, 17, R. G. Kar Road,

Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८६५ शकाब्दीय-संस्कृत-साहित्य-परिषन्मुखपत्रिकास्थ-विषय-सूची

(वर्णक्रमानुसारिणी)

निबन्धनाम	निबन्धकनाम	पृष्ठम्
अहल्याचरितम्—	श्रीकालीकिङ्कर-काव्य-व्याकरणतीर्थः	६, १५, २०
उपनिषत्प्रामाण्यचर्चा—	अनन्तकृष्ण शास्त्री	१०४
उपनिषदामद्वैतपरता—		२५, ३३, ४१
कलियुगचरितम्—	श्रीवैष्णवमहापालशर्मा	१
काव्यलक्षणविमर्शः—	वि. कृष्णस्वाम्यय्यङ्गार्यः	४, ११
चक्षुषः प्राप्यकारित्वम्—	श्रीआशुतोष न्यायाचार्यः	२६, ३७, ४८, ५३
देवभाषापरिषदोऽयोध्यानगराधिवेशने चतुर्दशी सभापत्यभिभाषणम्—	महामहोपाध्यायः श्रीअनन्तकृष्णशास्त्री	७१, ६०, ६५
परिभाषाणां निर्माणकाल—	वि, कृष्णस्वाम्यच्यङ्गार्यः	६, १७
वार्हस्पत्यसूत्रं रामायणं च—	न, राजगोपालाचार्यः	५१, ६१
महाधर्मपाल जातकम्—	श्रीअमरेन्द्रमोहन तर्कतीर्थः	६७, ८३
मेघदूतमीमांसा—	श्रीसरोजेन्द्रनाथ भञ्ज-काव्यतीर्थः एम-ए	१०१
वङ्गेषु दुर्भिक्षम्—	श्रीलक्ष्मीकान्त त्रिपाठी एम-ए	४६
वेदान्तोत्पलकारिका—	श्रीरमेशचन्द्रचर्ति वेदान्ततीर्थः, वि ए	३१, ३८
व्याकरणविमर्शः—	श्रीक्षितीशचन्द्र चट्टोपाध्यायः	७६, ८५
संस्कृतनाटकानि—	वि, कृष्णस्वाम्यय्यङ्गार्यः	१३,२२.२७,३५,४५
सत्यानुभावम्—	महामहोपाध्याय श्रीयुक्तकालीपदतर्काचार्यः (पृः १६६-१६४) १म-२य-३य-४र्थ-५म-६ष्ठ-७म संख्यासु	
सम्पादकीयम्—		२४, ५६
सम्राट् चन्द्रगुप्तः—	वि, कृष्णस्वाम्यय्यङ्गार्यः	५६

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकत्रयम् ३)

Foreign price—7s.

Printed by Dinabandhu Sahityashastri at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

October, 1944. Reg. No. C. 1073
Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
महामहोपाध्याया-
नन्तकृष्णशास्त्री
सहकारिसम्पादकः—
श्रीजानकीनाथ-
शास्त्री

संस्कृत-साहित्य-
परिषदो मासिकं
मुखपत्रम्

भारते मातु भारती

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भाषालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

October, 1944. | १८६६-शकीये आश्विने २७श-वर्षस्य ६ष्ठ-संख्या | Vol. XXVII, No. 6.

प्रमथनाथस्मृतिः

[महामहोपाध्यायश्रीकालीपदतर्काचार्यः]

एकैकशो लयमयन्ति पुरप्रदीपा रथ्यान्धकारनिकरेण वृतासमन्तात् ।
पान्थास्तमः प्रतिहताक्षियुगा विपन्नाः खद्योतकद्युतिरपि प्रचितोपयोगा ॥१॥
वाशिष्ठवंशपरमामिह भट्टपल्लीं यो जन्मना जगति मानवतीमकार्षीत् ।
सारस्वती तनुरिव प्रथितावदानो यातोऽद्य हा प्रमथनाथसुधांशुरस्तम् ॥२॥
यो राजकीयपुरसंस्कृतपाठशालामध्यास्य वश्यवचनः प्रथितः सुकीर्त्त्या ।
शीलोज्ज्वलप्रतिभया परितः प्रभावी यातोऽद्य हा प्रमथनाथसुधांशुरस्तम् ॥३॥
यो नित्यमुज्ज्वलतमाध्यवसाययुक्तो नानाविधामधिगतः किल शास्त्रविद्याम् ।
अध्यापनाप्रवचनादिभिराप कीर्तिं स प्राप हा प्रमथनाथसुधांशुरस्तम् ॥४॥
विज्ञानमाङ्गलवचस्यपि यस्य दीप्तं व्याख्यानशक्तिमपि तेन ततान भव्याम् ।
स प्रोज्ज्वलप्रतिभया सहितो मनस्वी यातोऽद्य हा प्रमथनाथसुधांशुरस्तम् ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्येषु दार्शनिकवर्त्मनि धर्मशास्त्रे यत्पाटवं निखिलभारतलक्ष्यभूतम् ।
शास्त्रार्थनिर्णयविधौ नितरां स्वतन्त्रो यातोऽद्य स प्रमथनाथसुधांशुरस्तम् ॥६॥
काश्यामपास्य विषयेषु रतिं निरूढां संसारसाधनयुतोऽपि गतः स्थितिं यः ।
जीवद्विमुक्तपदभागिव लब्धविद्यो यातोऽद्य स प्रमथनाथसुधांशुरस्तम् ॥७॥

नानागभीरविषया विमला निबन्धा
यन्निर्मिताः प्रकटयन्ति यशस्तदीयम् ।
सोऽयं विनिद्रधिषणो धिषणोपमानः
यातोऽद्य हा प्रमथनाथसुधांशुरस्तम् ॥८॥

आस्ये यस्य विकस्वरा सुमधुरा वाणी बुधाह्लादिनी
शीलं यस्य महत्तरं शुभपरं तुष्टं व्यधादन्तरम् ।
यस्यासीदुपदेशवागविरतं ज्ञानार्थिनां श्रेयसे
सोऽयं हा समुपागतः शिवगतिं काश्यांमहाभूतये ॥९॥

शर्वीं विभूतिमुपलब्धवतोऽद्य तस्य
लोकातिवर्तिगुणसंस्मरणप्रसादात् ।
अस्माकमस्तु चरितं नियतं पवित्रं
तत्पद्धतिश्रयणमस्तु चिरं श्रिये नः ॥१०॥

देवीशतकम्

[रचयिता—महामहोपाध्यायश्रीकृष्णनाथसार्वभौमभट्टाचार्यः]

(पूर्वानुवृत्तम्)

कदा वाराणस्यां हरिसलिलपादोद्भवजले
तनुं त्यक्त्वा सद्यः परमपदलीनोऽस्मि भविता ॥८९॥
असौ भृत्यस्तत्त्वं हृदि खलु विनिर्णीय बहुधा
पदाम्भोजद्वन्द्वे प्रणमितशिरा गोचरयति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वदुत्पन्नोऽयं त्वामयि जननि लीनो हि भविता
समुद्राद् वार्बिन्दुः प्रविशति समुद्रं न तु परम् ॥६०॥
त्वयि प्रेम्णा शम्भुर्विषयविमुखो योगनिरत-
स्तवाद्वैतं भावं भगवति गतः केवलमसौ।
त्वमप्यस्मै स्वीयं वितरसि शरीरार्द्धशकलं
महत्सु प्रीतेषु त्रिजगति हि कः किं न लभते ॥६१॥
नखेन्दोः सारूप्यं भजति किल ते धूर्जटिरसौ
पदाम्भोजद्वन्द्वस्य च कमलयोनिर्भगवति।
समुन्मीलच्छ्रीलद्युतिनयनयोः श्रीपतिरपि
प्रवीणा त्वद्भक्तिर्न वितरति किन्तत् सुकृतिने ॥६२॥
भजन्ति त्वां केचिद्द्रुतकनकगौरद्युतिधरां
जरन्मन्दाराणाममलरुचिपूर्णामपि परे।
पयोवाहव्यूहप्रतिमतनुमन्ये गतभियो
ज्वलद्रूपामाद्यां भजति भवतीं कोऽपि सुकृती ॥६३॥
चिदानन्दे पूर्णे त्रिगुणमयदीप्तत्रितनुभि-
र्जगद्रक्षासृष्टिप्रलयकुतुकानि प्रकुरुषे।
ततः क्रीड़ावृन्दश्रमकलितचित्ता नु(१)भवती
परानन्दे धाम्नि स्वगुणपरिहीणा विजयते ॥६४॥
विशन्तः स्वान्तःस्थे परममहसि स्पन्दरहिताः
पिवन्तस्ते पादद्वितयमकरन्दं स्थिरहृदा।
क्षणं यस्योद्रेकादमृततटिनीमज्जनसुखं
लभन्ते योगीन्द्रा जननि किल तत्त्वं भगवति ॥६५॥
कियन्तो ब्रह्माद्याः कति कति महेन्द्रादिविबुधाः
कियन्ति क्षुद्राणि क्रिमिकमशकादीनि जननि।

१। चित्तेषु—ख।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमीभिर्ब्रह्माण्डं कुहकशतसन्दानितमहो
त्वदीया दृग्भङ्गी जनयति चिरं नाशयति च ॥९६॥
मनश्चक्षुर्घ्राणश्रवणरसनादीन्द्रियगण-
स्त्वदीयध्यानाद्यैर्भवतु नियतानन्दनिलयः ।
अलीके त्वद्भेदे भ्रमविषयभूते त्रिभुवने
कदाचिन्नो यातु क्षणमपि महेशानि कृपया ॥९७॥
जगद्वन्द्यैर्वन्द्यां करुणपरिपूर्णाङ्घ्रिकमलां
सदानन्दोद्रेकां जगदभयदां चन्द्रवदनाम् ।
नखज्योत्स्नाज्वालाक्षपितकुमतिध्वान्तनिकरा-
महं वन्दे कुन्दप्रतिमदशनां पर्व्वतसुताम् ॥९८॥
महाविद्यामाद्यामसृतलहरीपूर्णचरणां
सदा पूर्णानन्दां कुमतितिमिरध्वंसमिहिराम् ।
विरिञ्च्याद्यैर्वन्द्यां पुरमथनभक्तिप्रणयिनी-
महं वन्दे देवीं क्षितिमिलितमूर्द्धा प्रतिदिनम् ॥९९॥
गतं भुक्तं पीतं रजनिदिनयोः क्रीड़ितमपि
स्मृतं सुप्तं दत्तं यदिह परिगीतं तव यशः ।
हुतं जप्तं यद्यत कृतमिह मयाशेषजनने
तदस्तं त्वत(१)पादे न खलु मम किञ्चित् क्षणमपि ॥१००॥
इह निगदितमेवं(२) कृष्णनाथद्विजेन
गुरुचरणसरोजं मूर्द्ध्नि कृत्वादरेण ।
श्रवणहृदयरम्यं स्तोत्रमेतद् भवान्या
भवतु तदनुतुष्ट्यै पाठतो वारमेकम् ॥
इति महामहोपाध्यायश्रीकृष्णनाथसार्वभौमभट्टाचार्यविरचितं
देवीशतकं समाप्तम् ।

---

१ । तदन्तत्वात्—ख । २ । ०तमेतत्—ख ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतनाटकानि

(पूर्वानुवृत्तानि)

[ग्रन्थकर्ता—वि. कृष्ण स्वाम्यय्यङ्गार्यः सुभाषिणीसम्पादकः, श्रीचामराजेन्द्रसंस्कृतमहापाठशाला, कल्याणपुरी]

ततश्च पात्राणामभिवृद्धौ क्रमेण संपूर्णाङ्गनाटकमवततार । अस्मिंश्च नाटके डयोनिसस्देवस्य चरित्रमेव प्रधानमितिवृत्त मुपादीयमानमासीत । कालक्रमेण पुनरपि देवतान्तरकथानामप्युपवर्णनमुचितमावश्यकञ्चेति विपर्यासान्तरमाधीयता धार्मिकविषयोपन्यासपरिपूर्णानि देवताचरित्रवर्णनानि देवताचरित्रवर्णना-रूपाणि नाटकानि प्रादुरभवन् । स्वतंत्रप्रवृत्तिकाले तु पूर्वेषां संप्रदायमतिक्रम्य कल्पितकथावस्तूनि रुद्रनाटकान्यपि प्राधान्यमुत्कर्षमादरपात्रताञ्चाधिजग्मुरिति त्वन्यदेतत । पेरिक्लीसस्याधिपत्ये ग्रीकाणां सुवर्णयुगे पारसीकानां पराजयादनन्तरं ग्रीकनाटकानि सर्वाण्यपि "अथेन्स्" नगरे यूरिपोडीस्, साफोक्लीस्, ईस्खिलस् इत्येभिस्त्रिभिराचार्यैः परिपूर्णरूपाणि समुत्कृष्टतमानि व्यरच्यन्तेति तु ग्रीकाणां पाश्चात्यप्रकृतिसिद्धस्य प्राचीनसंप्रदायाभिमानपरित्यागस्य महिम्ना समगच्छत। "पारसीकः" इति स्खिलसस्य नाटकं नाम्नैव कल्पितमितिवृत्तमिति व्यनाली परन्तु ग्रीकनाटकानामुत्पत्तिः काले धर्मस्य प्राधान्यमेतावदासीत यदलक्सान्द्रस्य कालेऽपि धार्मिकवस्तु प्रधानानि नाटकान्यभिनीयमानान्यासन । तेन सार्धं भारतदेशमागम्यात्र प्राधान्यमधिजग्मुश्च ग्रीकाणामनुकरणेन नाटकान्याविष्कुर्वन्तो भारतीया यत्सत्यं धर्मप्रधानानि पौराणिकान्येवेतिवृत्तान्युपाददिरे न चात्र लाक्षणिकनियमानुसरणमेव विनिगमकं प्रमाणमिति ग्रीकसम्पर्कस्य कारणतयोपन्यासो दूषणीयः । लक्ष्यदर्शनानन्तरमेव लक्षणप्रणयनस्यावश्यकत्वात् भासादिभिः प्रस्तावनायां कविकाव्यनाम्नोर्निर्देशमकुर्वाणैर्लाक्षणिकनियमानामुल्लंघनाच्च । नाटकोत्पत्त्यनन्तरं हि लाक्षणिकानां नियमरचनायामधि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारो न तु ततः प्रागपि न च ग्रीकागमनात्पूर्वमेव भारते नाटकान्यासन्निति वक्तुं शक्यते। प्रमाणानामभावात्। वैदिकसंवादानां नाटकमूलत्वस्यानुपपादनात्। यजुर्वेदे जीविकोपयुक्तानां वृत्तीनामन्वाख्यानावसरे नटानामनिर्देशेन वैदिककाले नाटकानामनुत्पत्तिविज्ञानात्। न चात्रोपलभ्यमानं शैलूषपदमेवाभिनेतृवाचकमिनि भ्रमितव्यम्। केवलस्य नृतत्तस्याऽपि देवताप्रसादनाय यज्ञादावुत्सवेषु च विहितस्योल्लेखसम्भवात्। तस्मात् दृढतरप्रमाणविरहात् भारतीयनाटकानां ग्रीकसम्पर्कात्पूर्वमुत्पत्तिरितिसिद्धान्तयितुं न शक्यतएवाअस्मदीयरीत्या च सम्भवति ग्रीकानुकरणान्नाटकोत्पतिः। ग्रीकनाटकानां भारतीयनाटकानाञ्च केषुचिदंशेषु महतस्सादृश्यस्याप्युपलम्भात्। तृतीयचतुर्थशतकयो (B. C.) ग्रीकेषु 'न्यूयाटिक् कामिडी' त्यभिख्यं "मैम्" इति प्रख्यातश्च नाट्यद्वयं प्रचरितमासीत्। अङ्कविभागः, अङ्कान्ते सर्वेषामपि पात्राणां निष्क्रमणम्, पात्रप्रवेशः, स्वगतभाषणम्, पात्रान्तऽस्य सूचितस्यैव प्रवेशः" इत्यादिष्वंशेषु निश्चयकारकं सादृश्यमुपलभ्यते। नाटिकाकथाश्च ग्रीकेष्वपि बहुधा ग्रथिता दृश्यन्ते। रत्नावल्यादिनाटिकासु यादृशानि प्रत्यभिज्ञानसाधनान्यङ्गुलीयकसंगमनीयमणिरत्नहारादीनि चमत्कारेण कविभिरुपनिबद्धानि तद्वत् ग्रीकनाटकेष्वपीति तादृशकथाभागा ग्रीकसम्पर्कादेव भारतीयैरुपात्तः। ग्रीकनाटकापेक्षया मैम्नाट्यादेव भारतीय नाटकानामुत्पत्तिरिति तु सयुक्तिकं पश्यामः। नाटकेषु ग्रीका मुखाच्छादनानि कारणान्तरेण धारयन्ति स्म,मैम्नाट्ये तु ग्रीकैर्विवृतवदनैरेवाभिनय, प्रदर्शितः। नाटकेषु पर्वतीयगुहासु गुप्तस्थलान्तरेषु वा चित्रितनि चित्राण्येव वृत्ताकारे चित्रग्रन्थौ परिभ्राम्यति (Rotating) क्रमशोऽभिव्यक्तिमुपगच्छत्यासन्। मैम्नाठ्ये तु यवनिकोपायुज्यतेति मैम्नाठ्यादेव ग्रीकसम्पर्काद्भारतीयानि नाटकान्याविरभूवन्। ग्रीकनाट्येषु—न तावन्नाटकेषु—बहुनि पात्राणि दृश्यन्ते। तेषु शकारविदूषकसमानान्यपि पात्राणि भागमवहन्त। विभिन्नानामनेकासां भाषाणामुपयोगोऽपि तत्राभ्यनुज्ञातोदृश्यते। अस्य सादृश्यञ्च मृच्छकटिके स्पष्टमुपलक्ष्यते। चारुदत्तनाटके भासकृते, तस्यमूलभूते प्राचीन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बौद्धनाटके च तावतां भाषाभेदानामनुपलम्भेऽपि मृच्छकटिके ग्रीकानुकरणं स्पष्टरूपमवभासते। एतच्च साधारणेभ्यः पौराणिकनाटकेभ्यस्सर्वेष्वप्यंशेषु भिद्यते। यद्यपि दूतवाक्यादिष्वेकाङ्कनाटकेषु भाणादिषु रूपकान्तरेषु च पात्राण्यल्पसंख्याकान्येव, तथाऽपि तावता ग्रीकसादृश्यस्यात्यन्तमभावो न साधयितुं शक्यते। संस्कृतभाषायां खी० पू० चतुर्थ तृतीयशतकयोर्विरचितानि नाटकानि नोपलब्धानि। तेषां स्वरूपं कीदृशमासीदिति न कोऽपि विजानाति। मृच्छकटिकवत् ग्रीकभाषायमपि 'मञ्जुषिका' "कलशिके" त्यादिरूपेण परिवर्तयितुमर्हाणि नाटकानि दृश्यन्ते। एकस्य नाटकस्य कथावस्तुनि प्रणयवृत्तान्ते न साकं राज्ञः पदभ्रंशनाय कुचक्रमपि कल्पयतां नीचानां केषांचिच्चरित्रमुपनिबद्धम्। न्यायस्थानस्य दृश्यम्, चारुदत्तवसन्तसेनयोस्समागमः स्वभार्यामन्यत्र दास्यमाचरन्तीं विमोचयितुं शर्विलकेन क्रियमाणं चौर्यम्, तस्या बन्धनमोक्षः, वसन्तसेनायाः वेश्याया अपि कुलवधूचितावृत्तिः, विटविदूषकशकाराणां पात्राणीत्येषु सर्वेषु विषयेषु ग्रीकनाटकस्येतिवृत्तमेव मृच्छकटिकस्यादर्शरूपेण परिणतमिति सम्भावयितुमप्यनुकुलं सादृयमुपलक्ष्यते। मृच्छकटिकान्तावन्मञ्जुषिकाकलशिकयोरादर्षमनुसृत्यैव विनिर्मितमिति वादिनोऽपि विमर्शकाः सन्ति। संस्कृतनाटकेषूपयुक्तो यवनिकाशब्दोऽप्यमुमेवार्थं द्रढयति। शाकुन्तलादिनाटकेषु यवनस्त्रियो राजपरिवारेऽन्तर्भूता धनुरानयनादिषु कार्येषु व्यापृता राज्ञस्साक्षात्परिचारिकाश्च दृश्यन्ते। तावति प्राचीनकाले यवनपदव्यवहार्या ग्रीका एव सम्भाव्यन्ते। एवञ्च परस्परसादृश्योपलम्भात् ग्रीकनाटकानामेव प्राचीनत्वाच्च तैः प्रभावितानि भारतीय नाटकान्युपपद्यन्त। न चैव भरतस्य नाट्यशास्त्रं ग्रीकसम्पर्कादपि प्राचीनं कथमत्र नाटकलक्षणान्युपन्यसिष्यति, लक्ष्याणामेव भवदुक्तरीत्याऽनुपलम्भादिति वाच्यम्। क्रि० श० प्रथमे द्वियीये वा शतके भरतनाट्यशास्त्रस्य लेखनेन ग्रीकाभियोगादपि तस्य प्राचीनत्वासिद्धेः। तथा च ग्रीकसम्पर्कदुत्पन्नानि नाटकानी" ति *

* This theiry begsno in page 6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एष पूर्वपक्षीयाणां वादः। वस्तुतस्तु भारतीयानि नाटकानि स्वतंत्रतयोत्पन्नानीत्येव युक्तम्। यदाह म्याकूडोनलोऽपि—"Sanskrit drama had a development quite independent of western influence" History of Sanskrit Literatue, pp 346 इति। अस्यार्थः—संस्कृतनाटकानि पाश्चात्यप्रभावस्यावकाशमदत्त्वा स्वतंत्रतयैवाभिवृद्धिमवापुः" इति।

सिद्धान्तः रामायणे तावद्वधूनाटकसंघैश्चेति वर्णनात्ततः प्राचीनान्येव नाटकानीति निर्णेतुं शक्यम्, भगवता पाणिनिनाऽपि कृशाश्वशिलालिविरचितयोर्नटसूत्रग्रन्थयोरुल्लेखात्। अभिनयकलाया जीविकानिर्वाहार्थं वृत्तिरूपेणानाश्रयणाद्यजुर्वेदे तस्या अपरामर्शोऽप्युचित एव यथा मृच्छकटिके द्वितीयाङ्के 'सुकुमारा खलु कला शिक्षिताऽर्येणे' ति वसन्तसेनयाऽभिहिते 'आर्य्ये कलेति शिक्षिता। आजीवि केदानीं संवृत्ते' ति संवाहकः सखेदमाह। एतेन हि संगीताभिनयादीनां ललितकलानां कीर्तिप्रदत्वात्कलाभिरुचिभिर्जनै रभ्यासः प्राचीनकाले कलापरिरक्षणायैव कृतो न तु स्वीयपाण्डित्यप्रदर्शनेन जठरपिठरपरिपूरणायेति स्पष्टमवगम्यते। यद्वा यजुर्वेदस्थं शैलूषपदं नटार्थबोधकमास्ताम्, अर्थान्तरस्वीकारे प्रमाणाभावात्। मुख्यार्थपरित्यागो हि बाधकान्तरोपन्यासमन्तरा नोपपादयितुं शक्यते। यद्वैदिककाले नाटकानामनुत्पत्तिरेव काममास्ताम्। रामायणात्प्रागपि नाटकानि नैवासन्निति साग्रहमन्धविश्वासे किं मानमिति पृच्छामः। ग्रीकाणामनुकरणमपि न कथञ्चिदुपपद्यते। यदि भारतीया ग्रीकाणांदेशं प्रस्थाय तत्र प्रतिष्ठितैर्विपश्चिद्भिस्साकं वादकोलाहलमारप्स्यन्त तर्हि शास्त्रज्ञानामुभयेषां समागमादन्योन्यमुपादेयविषयान्तरपरिग्रहस्सम्भवदुक्तिकोऽन्वास्यत।

(क्रमशः)

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकत्रयम् ३)
Foreign price—7s.

Printed by Dinabandhu Sahityashastri at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 17. R. G. Kar Road, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
महामहोपाध्याया-
नन्तकृष्णशास्त्री
सहकारिसम्पादकः—
श्रीजानकीनाथ-
शास्त्री

भारते मातु भारती

संस्कृत-साहित्य-
परिषदो मासिकं
मुखपत्रम्

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भाबालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

November, 1944.	१८६६-शकीये कार्त्तिके २७श-वर्षस्य ७म-संख्या	Vol. XXVII, No. 7.

संस्कृतनाटकानि

(पूर्वानुवृत्तानि)

[ग्रन्थकर्ता—वि. कृष्णस्वाम्यय्यङ्गार्यः सुभाषिणीसम्पादकः,
श्रीचामराजेन्द्रसंस्कृतमहापाठशाला, कल्याणपुरी]

राजकीयमधिकारमवाप्य भारतदेशमागतैर्ग्रीकैस्संस्कृतकवीनां समागमान्नाटकानामुत्पत्तिरभवदिति तु न समञ्जसम्, अनुकरणीयानां परकीयगुणानामत्र दवीयसि भारतीये कथमप्यप्रस्फुरणात । यवनपरिचारिकाणां राजपरिवारेऽनुप्रवेशमात्रेण को वा विषयो निर्धार्यते ? यवनिकाशब्दश्च यवनदेशादागतं वस्त्रमित्यर्थे प्रयुक्तोऽनुमीयते । ग्रीकनाटकशालासु यवनिकायाः कुत्राप्यनुपयोगात । अलक्सन्द्रेण साकमागता लेखकाः संगृहीतान् सर्वानपि विषयान्यद्यपि सावधानमलिखन. तथाऽपि तेषां प्रमाणलेखनाना- (Records)मधुनाऽनुपलम्भात न किमपि निर्णीतरूपेण सिद्धान्तयितुं शक्यम् । ग्रीकसादृश्यस्य महता प्रबन्धेन वर्णनमप्यनावश्यकमेव । अङ्कानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभागस्सर्वत्राऽपि मनीषिभिरुपकल्प्यत एव तत्राऽपि परकीयाणामनुकरणमेवेति चेत्, भोजनशयनासनादिष्वपि कार्येषु भारतीयाः परावलम्बिनः सिध्येयुः। अङ्कविभागमन्तरेण कथमिव नाटकं निर्मातुं शक्यम् ? किमिव भारतीयास्तादृशा मूढा यदेतादृशमतिसुग्रहमपि विषयमन्येभ्योऽवाबुध्यन्त ? ग्रीकनाटकशालानां भारतीयनाटकशालानाञ्च न मनागपि सादृश्यमस्ति। अस्मासु स्वतंत्रतयाऽभिवृद्धं वास्तुशिल्पमासीत्, यदनुरोधेन नाट्यमन्दिरनिर्माणमास्माकीनैस्सुकरमासीत्। यदि ग्रीकसम्पर्कादेव नाटकोत्पत्तिस्तर्हि कुतो व दुःखान्तानि रुद्रनाटकानि भारतभूमौ नावतीर्णानि ? अलक्सान्द्रस्य कालात्प्रागेव रुद्रनाटकानामुत्कृष्टतमानां ग्रीस्देशे प्रचारदर्शनानिसर्गतस्तेषामप्यत्रानुकरणस्यावश्यकत्वात्। 'पारसीकः' इत्यादीनां कल्पितवृत्तवतामपि नाटकानां ग्रीकैः पुरस्कारो दत्तः, तत्किमिति भारतीयाः प्रख्यातान्येवेतिवृत्तान्युपाददिरे ? पाश्चात्याः प्राचीनसंप्रदायं निर्भीतिलेशमतिचक्रमुः—प्रभारतीयास्तु प्राचीनानामुक्तिं तिरस्कृत्य स्वतंत्रतया प्रवर्तितुमनलमिति समाधानमनुचितमेव। ग्रीकसंपर्कात्प्रा नाटकानामेवानुत्पत्त्या को नु तदात्वे प्राचीनसंप्रदाय आसीत् यमनतिचिक्रंसिषवो भारतीयस्सुखान्तान्येव प्रख्यातेतिवृत्तविशिष्टान्येव नाटकानि प्राणैषुः ? तस्माद्ग्रीकसम्पर्कादेव भारतीय नाटकानामुत्पत्तिरिति वादो न तावदभ्युपगमानुज्ञामर्हति। मैमूनाट्येन सार्धं सादृश्यमप्येवमप्रकृतमेव। तत्तद्देशेषु परकीयप्रभावशून्यतया समुत्पन्नेष्वेव नाटकेषु परस्परसाम्यदर्शनेन तस्य विषयनिर्णयानुपयोगित्वात्। म्याग्डोनलेनैव—'While the Indian drama shows affinities with Greek comedy it affords more striking points of resemblance to the productions of the Elizabethan play wrighs and in particular of Shakespeare' * इति वदता "ग्रीक्नाटकापेक्षया भारतीयनाटकानां तावदस्माकमेलिज़बत्कालिकानां कवीनां नाटकैस्साकमेवाधिकतरं साम्यमुपलभ्यते। (क्रमशः)

* History of Sanskrit Literature—Macdonald p. 350

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभो लतापत्रतृणादिपूर्णा तरी तवेयं किमिदं प्रपन्नम् ॥१३॥
महार्घभाण्डानि कुतोऽपि जग्मू रत्नानि लुप्तानि तरीस्थितानि ।
गुर्वी तरी पूर्वमिहार्द्धमग्ना जलोदूर्ध्वभागे प्लवते लघुत्वात् ॥१४॥
या भारभूमिः पुरतः स्थिरात्मा न स्रोतसानीयत पादमात्रम् ।
सेयं सुदूरं तरसा व्रजन्ती संरक्ष्यते बन्धनयोक्त्रजालैः ॥१५॥
तरङ्गराजी गुरुभारपूर्णां यां पूर्वतः स्पन्दयितुं न शक्ता ।
सेयं तदाघातविकम्पिताक्षी तीरे लुठन्ती विकलेव भाति ॥१६॥
यद् यन्महार्घं तरणौ पुरासीत् तत् सर्वमेवात्र न चापि दृश्यम् ।
पदे तदीये तृणवल्लिपर्णं क एष दैवाहितनिग्रहो नः ॥१७॥
मूढा वयं किं करवाम यत् क्षमं मतिर्न निर्णीतिपथं प्रयाति नः ।
कृत्यस्य मार्गं परिदर्शय प्रभो त्वमेव नो ध्वान्तचयप्रभाकरः ॥१८॥
श्रुत्वा जनानां वचनं ससम्भ्रमं ससम्भ्रमो लक्षपतिः सुविस्मितः ।
समीक्षमाणः स्वसुतापतेर्मुखं जगाद वज्राहतवत् सुदुःखितः ॥१९॥
किमीक्षसे वत्स विपद्दुरुत्तरा समुत्थिता दैवतकोपसम्भवा ।
किमन्यथा नौगतसर्वसम्पदामशेषनाशः सुखनाशकारणम् ॥२०॥
क एष यस्यास्तुकथानुवर्तितामियं दशा दुःस्थतमा प्रपद्यते ।
किमीश्वरोऽयं कृतकेन वर्मणा प्रलम्भनं नः कुरुते रुषा ज्वलन् ॥२१॥
विलुप्तसर्वस्वतयाद्य शोच्यतां गतः किमादाय गृहं व्रजाम्यहो ।
महानयं दैवतनिग्रहः पुरः पुरातनादृष्टभवो विचेष्टते ॥२२॥
किमस्तु पाथेयमितः प्रवासिनां चिकीर्षतां जीवनयोनिवर्तनम् ।
इतो विदूरे स्वनिकेतनस्थितिः कमाश्रयामः सुरकोपताडितः ॥२३॥
स सत्यनारायण एव नापरस्तमस्विनां नेत्रगतेरगोचरः ।
अनादरेणैव पुरायमीक्षितः प्रसादिधिः पातकपातदूषितैः ॥२४॥
तदत्र तस्यैव पदारविन्दयोः क्षमार्थमर्थी भव बन्धुभिः समम् ।
विपत्तिमुद्धूय कठोरदुःखदां शुभं स कर्ता खलु सर्वशक्तिमान् ॥२५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिनु प्रसूनस्तवकं विकस्वरं तथावदातं तुलसीदलोत्करम् ।
सुपर्वदूर्वावलिमर्घसाधनं सुगन्धिगन्धद्रवमीशतोषणम् ॥२६॥
गृहाण गोधूमकचूर्णमुत्तमं फलानि मूलानि पयस्तथा सिताम् ।
घृतं मधु स्रौतसमम्बु तैः शुभं विधेहि नैवेद्यममेध्यतोज्झितम् ॥२७॥
सुगन्धिभिर्धूपजधूमसञ्चयैः कुरुष्व पूजागृहमन्धकारितम् ।
तमोविनाशाय च दीपमुज्ज्वलं प्रदीपय प्रीतिभृतेन चेतसा ॥२८॥
अनन्यचित्तः कुरु माधवस्तवं प्रदेहि पुष्पाञ्जलिमस्य तुष्टये ।
स तोषितः सर्वशिवं करोत्यलं स रोषितः कृन्तति सर्वमङ्गलम् ॥२९॥
पूजापदं पावय पूतपाथसा विधेहि देहञ्च पवित्रमञ्जसा ।
प्रचारय श्रीपतिभूतिमायतां कथागतां भक्तियुतः शिवाप्तये ॥३०॥
निवेदय श्रीपतिपादपङ्कजे स्वदीनतां सत्यसमर्च्चनाविधौ ।
क्षमां तथा कारय कारणात् सतो निजापराधस्य शिवाय भूयसे ॥३१॥
स एव सृष्टिं तनुते जगत्पतिः स पालकः संहृतिकारणञ्च सः ।
न तत्प्रसादेन विनान्यदेवता प्रसन्नतामेति हिताय वा क्षमा ॥३२॥
निदेशमात्रेण ततः सुतापतिः प्रवर्त्तयामास तथा तथा विधिम् ।
जना यथाशक्ति विचित्य सत्वरं वस्तून्यपेक्ष्याणि रसादुपानयन् ॥३३॥
विशुष्कशाखावयवैः ससाहृतैः समन्ततो दीपितवह्निमालया ।
निवर्तिताः श्वापदव्रातभोजिनः समं तमोभिर्भयदे निशामुखे ॥३४॥
श्रीसत्यनारायणभक्तिगीतिका मुखे समेषामुदभूत समस्वरा ।
नीराभिषेकादिपवित्रविग्रहः सत्यार्च्चने लक्षपतिः प्रचक्रमे ॥३५॥
क्रमेण पूजावसिता विधानतः परिस्तुताभिः स्तुतिभिः सुसंस्तवम् ।
कृतार्च्चनान्ते विहिता कथाश्रुतिस्तथा फलेनैव फलाय दक्षिणा ॥३६॥
सर्वां निशां तत्र तथैव जाग्रतः श्रीसत्यदेवस्तुतिगीतमङ्गलैः ।
वणिक्पतेर्लक्षपतेः प्रशृण्वतः समुद्गताकाशभवा सरस्वती ॥३७॥
पदे पदे लुम्पसि सत्यगौरवं विमूढ वित्तव्यसनेन मोहितः ।
विना विपत्तिं नहि ते हृदन्तरे कथा मदीया समुदेति वा भ्रमात् ॥३८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वयं विजानाति विधयमुत्तमः परेण दिष्टं समवैति मध्यमः ।
परोक्तवर्जं विपदा तथाधमो न बुध्यते केनचनाधमाधमः ॥३६॥
मयोपदिष्टो बहुधासि गौणतः प्रकाशतो मुख्यतयाद्य दिश्यसे ।
कदापि सत्यस्य कथां न विस्मरन् महाविपत्तौ वत दैवतः पतेः॥४०॥
ममैव रूपं सकलाः शरीरिणः भिदावबोधस्तु मृषावबोधतः ।
स सत्यभक्त्या विलयं प्रपद्यते न सत्यभक्तिस्त्वयि यन्न स क्षतः ॥४१॥
ममाद्य भिक्षूचितवेशदर्शिना त्वयावहेला महती प्रकाशिता ।
सुतापतिस्ते विषमं वचोविषं कियन्न मह्यं विकृतो व्यसर्जयत् ॥४२॥
वृथैव वित्तस्य मदः शरीरिणां मृषैव सौन्दर्य्यकृतश्च गौरवम् ।
चिरन्तनं किञ्चन नैव तद्द्वये क्षणेन नाशो ह्यनयोः सुसम्भवी ॥४३॥
य एव दैवाद् धनिकोऽद्य वीक्ष्यते स एव न श्वो नियमेन तादृशः ।
य एव दीनोऽद्य मुहुर्वनीयकः स एव च श्वो वसुधाधिनायकः ॥४४॥
धनोष्मणात्मानमवैति मानवो वसुन्धरायां भगवत्स्वरूपकम् ।
परस्य बोधं मलिनं समीक्षते स्वबुद्धिवैचित्र्यमपि प्रभाषते ॥४५॥
निजार्थपूर्त्यै विधिना विनिर्मितानवैति सर्व्वानपरान् विचेतनः ।
स्वविग्रहो यादृशरक्तमांसभाक् परस्य देहोऽपि तथैव नान्यथा ॥४६॥
दीने धनाढ्ये श्वपचे महीसुरे नार्य्यां नरे सिंहकुरङ्गयोस्तथा ।
समो न यस्यानुभवो भवान्तरे स सत्यनारायणभक्तिवञ्चितः ॥४७॥
सत्यस्य भक्त्या यदि भव्यमीप्सितं क्षिप्रं धनोष्मा परिहीयतां तदा ।
समानसम्मानकरो भवान्वहं महाधनानामपि दीनदेहिनाम् ॥४८॥
सत्यस्वरूपोऽहमवोचमादितः सत्यं तरीं ते बहुरत्नपूरिताम् ।
व्यतिक्रमेणाह तवात्मजापतिस्ततः किलाहं कुपितोऽन्यथा व्यधाम् ॥४६॥
मदीयपूजाघटवारिबिन्दुभिः सुतापतिस्ते यदि भक्तिमानमुम् ।
तरीं निषिञ्चेदथ सा ध्रुवं पुरः पुरातनीमेव दशामुपैष्यति ॥५०॥
सतां समेषां सकलेषु तुल्यता पृथङ् न तेषां मतिरुच्चनीचयोः ।
यथातपं यच्छति वासरेश्वरी हिमाद्रिशृङ्गे धरणौ न किं तथा ॥५१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा नदी केशरिपानगोचरस्तथा शृगालैरपि सा निपीयते ।
वने तरूणां फलसञ्चयः समं द्विजैः श्वपाकैरपि किं न भुज्यते ?॥५२॥
सूरातपं वारयते वटाचलः समं समेषां पथि यद्धि ताम्यताम् ।
महत्त्वमेतन्न किमस्य दीप्यते समत्वबोधप्रभवं जगत्त्रये ॥५३॥
अचेतनानामपि चेदियं गतिः सचेतनानां विरतिः कथं ततः ।
इतीव वातः प्रतिवेश्म सञ्चरन् गृहस्थसङ्घाननुबोधयत्यसौ ॥५४॥
पुरा हि यात्रासमये स्वमन्दिरात् नाहं त्वयास्मारिषि मोहसम्भ्रमात् ।
दग्धं गृहं वित्तचयश्च चोरिस्ततस्ततः पूर्वमिवाखिलं कृतम् ॥५५॥
ममावमानेन न भव्यभावना विधीयतां सर्वजगत्प्रभाविणः ।
कियन्त एवामितशक्तिशालिनो विधाय तं सर्वहितैर्वियोजिताः ॥५६॥
अद्य प्रभृत्याश्रय मन्त्रिदेशनो नवां दिशं स्वीयशुभाय शोभनाम् ।
नैवान्यथा मङ्गलसङ्गतिः पुरा पुराणमन्यायपथं परित्यजेः ॥५७॥
तदा शरीरेण विना सरस्वतीं वणिक्पतिर्विस्मयभीतिविह्वलः ।
निपीय कर्णेन सुतापतिं निजं नियोजयामास हितेन वर्त्तितुम् ॥५८॥
वणिक्सुतः शङ्खपतिः स सादरं सत्याज्ञया भक्तिविनीतचेतसा ।
प्रणम्य देवं धरणीविलुण्ठितस्तरीं न्यषिञ्चद् घटवारिणोत्थितः ॥५९॥
सभक्तिको लक्षपतिः स्तुतिं व्यधात् पुराकृतैरेष गतः कृतज्ञताम् ।
ननाम भूमौ विनिधाय विग्रहं सहैव चान्ये स्वजनाः सभक्तिकाः ॥६०॥
सत्यात्मकं लक्षपतिः सुरेश्वरं भक्त्या तदा स्तोतुमसौ प्रचक्रमे ।
कृताञ्जलिर्विष्णुपदे दधन्मनः पदे स्थितः स्वीयगणैः समावृतः ॥६१॥
प्रभो विमुग्धो भवदीयमायया विपद्यते देवगणोऽपि दैवतः ।
न कापि शक्तिस्तव शक्तिरोधिनी त्वमेव सर्वाधिपतिर्जगत्त्रये ॥६२॥
त्वामाहुरिद्धं पुरुषं गुणात् परं निर्लेपमम्भोजपलाशसम्मितम् ।
यदीयचैतन्यगुणानुकम्पया प्रधानमेतत् कुरुते जगत्त्रयम् ॥६३॥
त्वदिच्छया वा पुरुषप्रधानयोः समागमात् स्यान्महदादिसम्भवः ।
कर्म्माशयक्लेशविपाकवर्जितस्त्वमेव पातञ्जलसम्मतेश्वरः ॥६४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषदः सप्तविंशवर्षस्य

(१३४९ वङ्गाब्दस्य)

आय-व्ययनिष्कर्षः

(१) साधारणकोषः

आयः	
गतवर्षस्य व्ययावशिष्टः	
हस्ते ...	२७। =५
शुल्कपत्रे ...	।।।-०
वृत्तिरूपेण प्राप्तः	
(कलिकातातः)	७७१।।। ०
(स्थानान्तरात्)	३३९। ०
सामयिक-दानरूपेण	
दातृभ्यः ...	५८०॥ ०
गवर्णमेण्ट-सकाशात्	
(१९४२-४३)	९००)
करपोरेशन-सकाशात्	
(१९४१-४२)	
ग्रन्थागारार्थम्	६५०)
चतुष्पाठसाहाय्य-रूपेण ...	२४०)
पुस्तकादि-विक्रयात्	२०३॥≡०
प्रावेशिकरूपेण	९। ०
भि. पि. शुल्कपत्रात्	१० ≡१०
कुशीदरूपेण	५२।।। ०
अन्यतः	६५॥-१५
ऋणादितः	
गृहकोषात्	४४५)
सम्पादकादिभ्यः	४७८।≡१५
अग्रिमादि-प्रत्यर्पणात्	३०१॥ ०
साकल्येन	५०७३ ≡ ५

व्ययः	
पत्रिकार्थम्	८३३॥-१५
ग्रन्थागारार्थम्	८६९ ≡०
ग्रन्थप्रकाशार्थम्	४६९। ५
सभाभिनयाद्यर्थम्	२५ ≡१५
शिक्षाविभागार्थम्	२३३॥-१०
गृहभाटकालोकाद्यर्थम्	८६७ -१०
वर्त्तनाद्यर्थम्	४४१ ।- ५
गृहोपकरणाद्यर्थम्	२१ =१०
पाथेयार्थम्	२४ =१५
साधारण-मुद्रणार्थम्	२॥ ०
पत्रादि--शुल्कपत्रार्थम्	१२॥≡१५
करपोरेशन-शुल्कार्थम्	९४ ।=१०
भि. पि. शुल्कपत्रार्थम्	२ =१०
विविधविषयार्थम्	२० ॥=०
ऋण-प्रत्यर्पणार्थम्	
सम्पादकादेः	१२५)
गृहकोषस्य	३००)
अग्रिमाद्यर्थम्	३०५)
	४६४७ -०
उद्वृत्तः	
सेण्ट्राल व्याङ्कागारे	३२३ ≡०
हस्ते ...	९५॥-०
शुल्कपत्रे ...	७ ।= ५
साकल्येन	५०७३ ≡ ५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२) गृहकोषः

(१३४६ वङ्गाब्दे)

१३४८ वङ्गाब्दावसाने	३०२१॥≈१५
१३४६ वङ्गाब्दे आयः	७०५॥‒०
	३७२७ ≡१५
१३४६ वङ्गाब्दे व्ययः	७३ ।≡१०
अवशिष्टः	३६५३॥। ५

उद्धृत्तस्य विवरणम्—

सेण्ट्राल व्याङ्क अफ इण्डिया (श्यामवाजार-शाखायाम्) न० ५८०१	३२१॥‒०
वेङ्गल सेण्ट्राल व्याङ्क (Current Account)	५८३ ≡१५
५% गवर्णमेण्ट लोनपत्रे	१०००)
अश्विनीदत्तवर्त्मस्थ-गृहादि	१४६८। ०
१३४६ वङ्गाब्दावसाने साधारणकोषतः प्राप्यम्	२६५)
हस्ते	१५॥≡१०
	३६५३॥। ५

(३) ग्रन्थालय-कोषः

(१३४६ वङ्गाब्दे)

गतवर्षस्य प्रत्यर्पणा-वशेषितम्	७१३)
१३४६ वङ्गाब्दे न्यास-रूपेण प्राप्तम्	१६३)
	९०६)
१३४६ वङ्गाब्दे प्रत्यर्पितम्	१२४)
	७८२)

उद्धृत्तस्य विवरणम्—

पोष्ट आफिसागारे	१३॥‒१५
साधारणकोषे ऋणरूपेण दत्तम्	६२१॥‒ ५
सेण्ट्राल व्याङ्क अफ इण्डिया (श्यामवाजार-शाखायाम् न० ३७८७)	१४६॥।‒०
	७८२)

श्रीरामकृष्ण-चक्रवर्ती

आय-व्यय-लिपिरक्षकः

श्रीअमरेश्वर-ठाकुरः
श्रीदुर्गामोहन-भट्टाचार्यः } सम्पादकौ

जे. सि. चक्रवर्त्ती

आय-व्यय-लिपि-परीक्षकः

संस्कृत-साहित्य-परिषत्,
श्यामवाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकत्रयम् ३)

Foreign price—7s.

Printed by Dinabandhu Sahityashastri at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 17, R. G. Kar Road, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
महामहोपाध्याया-
नन्तकृष्णशास्त्री
सहकारिसम्पादकः—
श्रीजानकीनाथ-
शास्त्री

भारते मातु भारती

संस्कृत-साहित्य-
परिषदो मासिकं
मुखपत्रम्

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

December, 1944 | १८६६-शकीये मार्गशीर्ष २७श-वर्षस्य ८म-संख्या | Vol. XXVII, No. 8

देवीशतकम्

[रचयिता—महामहोपाध्यायश्रीकृष्णनाथसार्वभौमभट्टाचार्यः*]

स्वयम्भूः शम्भुः श्रीपतिरपि चिराराधनपरा
न शक्ता यत्पादद्वितयमहिमानं कथयितुम् ।
अयं मर्त्यः स्तोतुं चटुलरसनां प्रेरयति य-
च्छिशूनामागस्तज्जननि परिहार्यं करुणया ॥१॥
चतुर्वक्त्रैर्ब्रह्मा पुरभिदपि पञ्चाननवरैः
फणीन्द्रोऽप्यास्यौघैः प्रभवति न यस्याः स्तुतिविधौ ।
अयं तां स्तौतीदं स्वहृदि विनिधायैव मनुजः
शिशूनां चापल्यं भवति जननीनां प्रियकरम् ॥२॥

* येन खलु तार्किकदेशिकेन 'कविना स्त्रीसहायेन' 'आनन्दलतिका'भिधं चम्पूकाव्यं ग्रथितमस्यामेव पत्रिकायां पूर्वं कैश्चिद्बुधैः प्रकाशितं च, स एवायम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कठोरं मच्चित्तं कुलिशगिरिखण्डादपि शिवे
शिरीषादाहुस्त्वच्चरणनलिनं कोमलमपि ।
कथं कुर्यामस्मिंस्तदिति बहुचिन्ताकुलधियं
कृपा दीने मातुर्वहुरिति च गाथा स्थिरयति ॥३॥

न ते रूपं वेत्ति श्रुतिरपि न गीर्वाणनिवहो
नवा चान्यच्छास्त्रं(१) न पटुकरणो योगिनिकरः ।
कथं वेत्तु क्षुद्रो मनुज इति चिन्ताजड़धिय-
स्त्वमम्ब त्राणं मे कुरु करुणयैवात्र जनुषि ॥४॥

अचिन्त्यं योगीन्द्रैः श्रुतिरपि न यद्वेत्ति परमं
तदस्मिन व्यर्थं मे चपलमनसो घूर्णनशतम्(२) ।
निबद्धस्यापारे भवजलधिगम्भीरकुहरे
निमग्नस्योद्धारे भवतु तव नामैव तरणिः ॥५॥

हरिस्ते कारुण्यं विधिरपि च पादाम्बुजरजः
पुरारिर्भ्रूभङ्गीं करुणकलितां वाञ्छति सदा ।
श्रुतौ श्रुत्वैवेतद्धरणिधरकन्ये न मनसो
लभे स्थैर्यं कुर्यां किमिति मम चित्तं व्यथयति ॥६॥

गिरां दूरे धाम्नि श्रवणनयनादीन्द्रियगणा
गता नैराश्यं तत किमिदमिति चिन्ताङ्कितमम् ।
स्फुरज्ज्योत्स्नापुञ्जक्षयितजगतीतीव्रतमसो
नखेन्दोः स्पर्शेन स्थिरय मम चित्तं करुणया ॥७॥

फलं मतकर्मभ्यो यदि जननि का ते प्रभुकता
यदि द्वारं तत्त्वं सृजसि कथमेतद्बहुविधम् ।
त्वदिच्छातः सर्वं तदयमिति निर्णीय मुदितः
सुतोद्वेगे मातुः क्वचिदपि यदृच्छा न भवति ॥८॥

१। नानाशास्त्रम्—'ख'पुस्तके । २। ॰शवैः—ख ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न ते भक्तिश्रद्धाभजनकणिकानेन रचिता
न वैराग्यं चित्तं(१) स्पृशति जननि क्वापि जनने ।
अदश्चिन्तावारांनिधिनिपतितं चञ्चलधियं
त्वदन्यद् यत्किञ्चित् स्थिरयति कियत् पामरमिमम् ? ॥९॥

गतं मे कौमारं सहचरशिशुक्रीडनशतै-
स्तथा तारुण्यञ्च प्रवरललनाकेलिनिवहैः ।
जराजीर्णं पूर्णं विषयमृगतृष्णाङ्कितधिया
कृपालेशादेनं जननि परिपाहि त्वमधुना ॥१०॥

अविद्याप्रागल्भ्यादियति जनुषि त्वामभजता
स्थितं कुम्भीपाकप्रमुखनिरयौघे कति मया ।
तथा श्रद्धां मह्यं वितर करुणाम्भोधिचरणे
यथा नायं भूयो भवनरकगर्भं प्रविशति ॥११॥

स्वयम्भूश्रीजानित्रिपुरहरयोगीन्द्रनिवहाः
समीहन्ते नित्यं सकरुणकटाक्षं पदनताः ।
अयं मर्त्यः कर्तुं प्रभवति किमित्याकुलधियं
त्वमुद्धर्तुं शक्ता भवसि न परः कोऽपि जगति ॥१२॥

विहाय त्वामम्बां कुमतिपरिपन्थिक्षतहृदो
भजन्तेऽन्यान् मूढा बहुजनिकृतागः क्षपयितुम् ।
विघूर्णन्ते जन्माद्यधिकुहरमध्येऽनवरतं
न खद्योताद् ध्वान्तं रविकिरणनाश्यं विरमति ॥१३॥

बुभुत्सां कुर्वन्तस्तव जननि तत्त्वे हतधियो
मनोनिष्ठां कुर्वन्त इह कतिचित्तीव्रतपसः ।
अबोध्यं तज्ज्ञात्वा हरिहरविरिञ्च्यादय इमे
विरम्यातो नित्यं तव चरणसेवां विदधते ॥१४॥

---

१ । चित्ते—ख ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्रुवं त्यक्त्वा चेतोऽध्रुवमनुजघूर्णं प्रतिदिनं
न पीयूषद्राक्षामधुरमधुरे नाम्नि रुचिभाक् ।
फलं लब्धं तस्य प्रतिनियतगर्भेषु मयका
न भूयस्तद्गर्भं विशति तव भृत्यः कुरु तथा ॥१५॥
दयार्थं जीवानां वससि हृदये जीवनवतां
तथापि त्वत्पादाम्बुजयुगलचिन्ता नहि कृता ।
कथं मृत्युव्यालान्मम जननि न स्यादभिभव-
स्तदाराध्याराध्यं परमशरणं देहि चरणम् ॥१६॥
मनो दम्भद्वेषप्रभृतिभिरधर्म्मैष्वभिरतं
न ते पादाम्भोजं क्षरदमृतसिक्तं प्रविशति ।
सितां त्यक्त्वा मौढ्याज्जननि यदि निम्बं हि भजते
तदास्मै तज्ज्ञानं वितर विपदं येन तरति ॥१७॥
न गीर्वाणैश्वर्य्यं न यमदमनं योगविभवं
न वैरिञ्च्यं याचे न मुररिपुतां नापि हरताम् ।
परन्त्वेकं भिक्षे जननि तव पादाम्बुजरजः-
कणाधारत्वं मे भवतु भवतापोपशमनम् ॥१८॥
रसज्ञायां सत्यां जननि नहि गीतं तव यशः
श्रुतौ सत्यां नाम श्रवणमधुरं न श्रुतमपि ।
न वा दृष्टौ सत्यां कलितमपि रूपं प्रतिकृतौ
भवाब्धिर्दुष्पारः कथमहह तार्यः कुमतिना ॥१९॥
न जानामि स्वल्पामपि हि वरिवस्यां कुमतिभि-
र्न शक्नोमि श्रद्धां विरचयितुमम्बालसतया ।
न वा ध्यातुं शक्तो विषयरसतृष्णान्धितधिया
गतिं कां वा यास्याम्यहह भववारांनिधिजले ॥२०॥
भवन्नाम्ना तुच्छस्तरणितनयोऽमानि मयका
ततः क्रुद्धः सन मे निजपरिजनैरेति पुरतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वकीयं भृत्यञ्चेत् परिभवितुमन्यः प्रभवति
प्रभुत्वं नाथानां ह्रसति तदिमं त्राहि कृपया ॥२१॥

त्वदीयो भृत्योऽहं सुचिरमियमाहोपुरुषिका
कृतान्तं मच्चित्तं लघुहननमिवालोकयदहो ।
अतो रोषादेष स्फुरति पुरतो योद्धृसहित-
स्त्वदीयं भृत्यं किं परिभवितुमन्योऽपि यतते ॥२२॥

अदूरे दृश्यन्ते यमसदसि कोलाहलकृतो
यदर्थं निद्राणः ... ...(?) ।
क्षणं तच्चैतन्यं वितर करुणावारिधिपदे
विपद्ध्वस्तो भृत्यस्तरति विपदो येन सहसा ॥२३॥

जगत् सूते लीलाकलितनिजदृष्ट्यैव भवती
जगद्बाह्यो नाहं त्वयि च जननी त्वं मम ततः ।
अतो मृत्युव्यालं तृणमिव न पश्यामि गतभीः
स्थितायामम्बायां न खलु शिशवो बिभ्यति यतः ॥२४॥

निबध्नासि स्वैरं विषयदृढदाम्ना(१) निजसुतान्
महाशोकाम्भोधौ क्षिपसि बहुशोऽनन्तजनुषि ।
कृतान्तादप्युग्रां कलयसि च पीड़ां बहुविधां
जगन्मातृत्वं ते किमिदमतिचित्रं विजयते ॥२५॥

त्रिलोकीमिन्द्राय श्रियमपि महेशानि हरये
तनोरर्द्धं भर्त्रे स्वपदमपि भक्ताय ददती ।
अमुष्मै दीनाय स्फुटनलिनपादाग्रजरजः-
प्रदाने काठिन्यं वहसि किमु ते पैतृकगुणः ॥२६॥

भवाब्धौ गम्भीरे करग(?)तिमिनक्रे गृहजने
मनोबाह्यश्रेणीलहरिभृति चेतोहययुते ।

१ । विषयबहु०—ख ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुरङ्गाक्षीक्रीड़ाप्रबलवड़वाग्नौ रतिविषे
निमग्नस्योद्धर्त्री वरतरणिरेकैव भवती ॥२७॥
निपात्योद्दीप्तौजोदनुजनिवहान् भ्रू विलसितै-
र्महेन्द्रब्रह्मादीन जननि कतिधा नोद्धृतवती ।
इमं दीनं त्राहि प्रभयमनुपायं करुणया
भवेत्त्राणे दीनस्य हि सदयता नैव महताम (?) ॥२८॥
महामोहान्धोऽयं तरणपथदृष्टौ न कुशलः
कुधीः कामी मातर्न तव पदसेवासु कृतिमान ।
तथाप्युद्धर्त्रीं मां त्वमिति दृढगर्वं हृदि वहे
न यातापत्यानां प्रबलतरदुःखं हि न हते (?) ॥२९॥
मनः संसारेऽस्मिन् भवमृतिभयेष्वेव रमतं
चकोरः शीतांशाविव दृगपि योषिद्वरमुखे ।
त्वयैवं लीलाभिर्विकलितहृषीकस्य नृपशो-
र्विना मे त्वामद्य त्रिजगति न पश्यामि शरणम् ॥३०॥
अमुष्मिन् संसारे बहुविधशरीरं विदधती
सुधां वा स्वाद्वर्थान् कति कति हि नास्वादयसि माम् ।
अतुल्यत्वत्पादाम्बुज-युगलमाध्वीकमधुना
कियत् पातुं याचे वितरतु दयाम्भोधिचरणे ॥३१॥
अमुष्मिन् ब्रह्माण्डे जननि तव सृष्टिर्बहुविधा
मनो मे तास्वेव भ्रमति नियतं नो विरमति ।
क्षणं ताभ्यो हृत्वा स्वपदकमलद्वन्द्वमधुनः
प्रवाहे लीनं तत कुरु करुणया ब्रह्ममहिषि ॥३२॥
भवद्भ्रूभङ्गीभिः कति कति महेन्द्रादिविबुधा
दिगीशाः सम्भूतास्तव चरणसेवास्वभिरताः ।
इदं ज्ञात्वाप्येतन्न परिचरितुं धावति मनः
कथं मे निस्तारस्तदिह न हि पश्यामि जननि ॥३३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिरं दुःखायैते तदपि विषयान् नोज्झति मन-
स्तवानन्दस्यन्दि स्पृशति न तथाप्यम्ब चरणम् ।
मदीयं मामुन्मूलयति यददः पामरतमं
जगच्छास्त्री शाधि त्वमतिगुरुदण्डेन तदिदम् ॥३४॥

शिरोरत्नं स्रष्टुर्हृदयनिहितं भूतपतिना
स्वभक्ताभीष्टानां वितरणविधौ कल्पलतिका ।
नखज्योत्स्नोद्दीप्तं कनकमणिमञ्जीररुचिरं
पदद्वन्द्वं मातुः स्फुरतु नियतं चेतसि मम ॥३५॥

अदूरे श्रूयन्ते शमनभटहुङ्कारनिकरा
स्त्वमुन्मत्तं चेतस्त्यजसि न हि निद्रां निशि दिवा ।
सदा पूर्णानन्दं जगदभयदानैकनिपुणं
पदाम्भोजं मातुः शरणमधुनाप्याश्रय धिया ॥३६॥

शरण्ये साधूनां पुरमथनवक्षःस्थलगते
सुधाधाराधारे जगदभयदानव्यसनिनि ।
मनो मे त्यक्त्वान्यत् प्रविश शमनोत्तापशमने
पदाम्भोजद्वन्द्वे क्षितिधरसुतायाः क्षणमपि ॥३७॥

मनोभृङ्गो नानाविषयकुसुमेषु प्रतिदिनं
वसन् वाच्छावाहो जठरमपि भर्त्तुं नहि कृती ।
यदि त्वं कारुण्याद्वितरसि पदाम्भोरुहवनं
तदाकण्ठं पीत्वा जठरगततापाद् विरमतु ॥३८॥

यदास्तेऽमुष्यैवोदरवसतिकृत कर्म्मगहनं
तदा त्वत्पादाब्जोदरवसतिभिस्तत् सफलय ।
यदि स्याद्भोगानां जनकमपि जन्मान्तरकृतं
तदाप्येतस्याम्ब प्रचुरमधुभिस्त्वं विरचय ॥३९॥

कलत्रापत्यानां प्रणयचरणाभिर्गतभयं
भवान्याः सेवायै क्षणमपि मनो नाप्यकरवम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080550

ह्रिया कण्ठः कुण्ठः स्तवनमपि कर्त्तुं न कुशलो
न दण्ड्यं मद्भिन्नं यमसदसि पश्यामि कमपि ॥४०॥
अरे मूढ़ात्मन किं भ्रमसि ललनाकेलिनिलये
त्वदग्रे न ग्रावा न च जलनिधिर्नापि तरवः ।
न तारुण्यस्पर्शस्तव परमवृद्धोऽसि नितरा-
मिदानीमम्बायाः पदनलिनशालां प्रविश रे ॥४१॥
रसज्ञा नादत्तेऽमृतरसभरां नामकणिकां
करौ स्तः स्पर्शे नो विमलकमलाङ्क्(१)र्हतधियः ।
मनो नाद्यापीदं त्यजति विषयास्वादनरसं
महामोहान्धोऽहं यदि शरणमस्यम्ब कृपया ॥४२॥
त्रिलोकी त्वत्सेवां कलयति च नाहं कुमतिको(२)
यशो गायन्त्यन्ये हरिहरमुखा नायमधमः ।
जपन्त्येके नामाप्यविरतमसौ तत्र विमुखः
कथं द्रक्ष्यस्यन्ते कुपितमति वैवस्वतमुखम् ॥४३॥
कृतान्ताद् भीतं मामव जननि नित्यं जनिमतं
स्वसृष्टं क्षुद्रोऽपि स्फुटविपदि गोपायति मुहुः ।
कृपामीषत्तस्माद् वितर जगदाराध्यचरणे
समुद्रो वार्भिर्न व्ययत इह किञ्चिन्न ह्रसति ॥४४॥

(क्रमश)

१। परिचरणलेशी—ख। २। कुमतिमान्—ख।

संस्कृत-साहित्य-परिषत्, वार्षिकमूल्यम्—रूप्यकत्रयम् ३)
श्यामबाजार, कलिकाता। Foreign price—7s.

Printed and Published by

Dinabandhu Sahityashastri

Sanskrit Sahitya Parishad, 17, R. G. Kar Road,

Shyambazar, Calcutta.

Printed at the Calcutta Oriental Press, Ltd.,

9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri